Barcode : 99999990173003
Title -
Author -
Language - sanskrit
Pages - 174
Publication Year - 1828
Barcode EAN.UCC-13



श्रीः ।

# सरस्वतीमणिमाला ।

## ( निघण्टुमणिमाला )

# वैदिककोषः

जयपुरराजसभाप्रधानपण्डितविद्यावाचस्पति
श्रीमधुसूदनशर्मणा मैथिलेन विरचितः ।

प्रथमं संस्करणम् ।

सोऽयं
जयपुरे बालचन्द्रयन्त्रालये मुद्रयित्वा
प्रकाशितः ।
शाके १८२८
मूल्यमाणकाष्टकम् ।

श्रीः ।

# भूमिका ।

सुप्रतिपन्नमिदं सर्वैरपि प्रज्ञाचक्षुर्यद्वेद एव भारतीयानां परं निःश्रेयसकारणम्, असाधारणो गौरवहेतुः, गरीयसी संपच्चेति । स चाद्य सर्वपुरुषार्थहेतुः, कालपर्ययाद्विपर्यस्तमतिभिरस्माभिरत्यर्थमुपेक्षित इत्यपि भावयन्त्येव कालेऽस्मिन् भावुका विपश्चितः । परं चिराद्वेदार्थपरिशीलनपराया विच्छिन्नत्वेन तदर्थमतितरां प्रयतमानैरपि बहुभिर्नाशानुरूपं फलमुपभुज्यत इति तस्य पुनः प्रचाराय तदर्थबोधनायोपयुज्यमानानामङ्गग्रन्थानां प्रचार इदानीं बहुतरमपेक्ष्यते, अर्थबोधनाय चोपयुज्यमानेष्वपि बहुष्वङ्गेषु कोश एव प्रथमं सोपानमिति लोकसाम्यादेवावगम्येत विद्वद्भिः । वेदाङ्गः कोशश्च समाम्नायापरपर्यायो निघण्टुनामातिप्राचीनो भगवद्यास्ककृतनिरुक्ताख्यभाष्यसंवलितः प्रसिद्धयत्येव सर्वत्र । परमत्र पठितानां नाम्नां मुक्तकरूपतया

न तानि सौकर्येणाभ्यासितुं पारयन्ति विद्यार्थिनः, न चा-
त्राभ्यसनसौकर्यार्थमुपयुज्यमानः सन्निवेशक्रमोऽपि यथा-
वद् दृश्यते, बहवश्च शब्दा अत्र सन्दिग्धार्थकत्वेनैवोपनिब-
द्धाः, भाष्यकारेण च भगवता यास्केन सुविचार्य कृतेऽपि
तदर्थनिर्णये न ततः सम्यगवगन्तुं पार्यते मथमाधिका-
रिभिः । ताभिरेताभिरनुपत्तिभिर्जायमानां वेदार्थाधिगमे-
च्छूनामुत्साहक्षतिमालोक्य तन्निवर्तनाय यथाशक्यमहं
प्रावर्तिषि । तत्र देशेऽस्मिंश्चिरात्प्रवृत्तां पद्यमयकोशाभ्य-
सनपरिपाटीमनुरुध्य पद्यमयेनानेन प्रबन्धेन निघण्टूक्ताः
शब्दाः प्रकरणशो विभज्योपनिबद्धाः सन्दिग्धाश्चापि नि-
रुक्तप्रतिपादितार्थेन व्याख्याताः, किं च बहुतरोपयुक्तो
दैवतनिरूपणांशोऽपि निरुक्तविवृतः सूक्ष्मरूपेणेह प्रति-
पादितः । तदवश्यं सम्यगभ्यस्तोऽयं निबन्धो वेदार्थविज्ञा-
नमेषामत्यर्थमुपकुर्यादिति विश्वसिमः ।

अत्र च ग्रन्थे निघण्टुप्रतिपादिता एव शब्दा उपनि-
बद्धा नातिरिक्ताः । यद्यपि सन्त्येवापरेऽपि बहवः शब्दा
वेदेषु श्रूयमाणा ये नोपनिबद्धा भगवता निघण्टुकृता, न

च स्पृष्टा भगवता यास्केनापि; परं नेतऽत्राप्युपनिबद्धाः। तेषामपि तु शब्दानां ब्राह्मणग्रन्थानुसारि निरूपणं चिकीर्षितमस्माभिः; तद्यदि ग्रन्थमिमं पर्यालोच्य प्राज्ञवरा वर्द्धयिष्यन्त्यस्मदुत्साहं तर्ह्यचिरादेवापरेण भागेन निघण्टुपठनभिहितानामपि शब्दानां कोशं प्रकाशयिष्यामः। अन्ततश्च प्रीयतामेतेन व्यापारेण भगवान् भूतभावनो वेदपुरुष इत्याशासाना यत्नमिमं सफलयितुं विदुषां सापेक्षदृष्टिपातमभ्यर्थयामहे। इति शुभम्।

# वैदिककोषस्य विषयानुक्रमः ।


| | | पृष्ठ | श्लोकाः |
|---|---|---|---|
| **देवतवर्ग-** | | | |
| १ | त्रिलोकीस्था देवताः | १ | १ – ७ |
| २ | भूमिष्ठा देवताः | २ | ८ – १८ |
| ३ | अन्तरिक्षस्था देवताः | ३ | १०–२४ |
| ४ | दिविष्ठा देवताः | ४ | २५–३१ |
| **दिव्यवर्गे—** | | | |
| १ | द्यावापृथिव्यौ | ६ | १ – ३ |
| २ | पृथ्वी | ६ | ४ – ४॥ |
| ३ | हिरण्यम् | ७ | ४॥ – ६ |
| ४ | अन्तरिक्षम् | ,, | ६ – ७॥ |
| ५ | दिशः | ,, | ७॥ – ८॥ |
| ६ | किरणाः | ,, | ८॥ – ११ |

| | | पृष्ठ | श्लोकाः |
|---|---|---|---|
| ७ | दिनम् | ८ | १२ — १२ |
| ८ | उषाः | ,, | १३ — १४ |
| ९ | रात्रिः | ,, | १५ — १९ |
| १० | मैत्रः | ८ | १७ — २० |
| ११ | जलम् | ९ | २१ — २७॥ |
| १२ | नदी | १० | २८ — ३१॥ |
| १३ | अश्वाः | १० | ३२ — ३९ |

**मनुष्यवर्गे—**

| | | | |
|---|---|---|---|
| १ | मनुष्यः | ११ | १ — २॥ |
| २ | मेधावी | १२ | २॥ — ३ |
| ३ | स्तोता | ,, | ४ — ४ |
| ४ | ऋत्विक् | ,, | ५ — ५ |
| ५ | अध्यक्षः | ,, | ६ — ५॥ |
| ६ | चौरः | १२ | ५॥ — ७ |
| ७ | अपत्यम् | १३ | ७ — ८ |

| | | पृष्ठ | श्लोकाः |
|---|---|---|---|
| **धर्मवर्गे—** | | | |
| १ | महान् | १३ | १ — २ |
| २ | क्षुद्रः | १४ | ३ — ३ |
| ३ | बहुः | १४ | ४ — ४ |
| ४ | समीपः | १४ | ४ — ५॥ |
| ५ | दूरः | १४ | ५॥ — ६ |
| ६ | पुराणः | १४ | ६ — ६॥ |
| ७ | नवीनः | १५ | ६॥ — ७ |
| ८ | अन्तर्हितः | १५ | ७ — ८ |
| ९ | सुन्दरः | १५ | ८ — ९ |
| १० | रूपम् | १५ | ९ — १०॥ |
| ११ | हस्तौ | १५ | १०॥ — १२ |
| १२ | अङ्गुलयः | १६ | १२ — १४ |
| १३ | कर्म | १६ | १४ — १५ |
| १४ | यज्ञः | १६ | १५ — १६॥ |


| | पृष्ठे | श्लोकाः |
|---|---|---|
| १५ सत्यम् | १७ | १६॥ – १७ |
| १६ वाक् | १७ | १७ – २१॥ |
| १७ प्रज्ञा | १७ | २१॥–२२॥ |
| १८ सुखम् | १८ | २३ – २४॥ |
| १९ बलम् | १८ | २५ – २७ |
| २० क्रोधः | १८ | २७ – २८ |
| २१ वज्रम् | १८ | २८॥–२९॥ |
| २२ युद्धम् | १९ | २९॥–३४ |
| २३ धनम् | १९ | ३५–३६ |
| २४ गौः | २० | ३६–३७ |
| २५ अन्नम् | २० | ३७–३८ |
| २६ गृहम् | २० | ३८–४० |
| २७ कूपः | २१ | ४०–४१ |
| २८ प्रज्वलनम् | २१ | ४१–४२॥ |
| २९ शीघ्रः | २१ | ४२॥–४५ |

| | | पृष्ठ | श्लोकाः |
|---|---|---|---|
| क्रियावर्गे- | | | |
| १ | गतिः | २२ | १ — १० |
| २ | व्याप्तिः | २३ | १० — ११ |
| ३ | ईशनम् | २३ | ११ — १२ |
| ४ | अभ्येषणा | २३ | ११ — १२ |
| ५ | अर्चा | २३ | १२ १६ |
| ६ | परिचर्या | २४ | १६ १७ |
| ७ | याचना | २४ | १७ १६ |
| ८ | ईक्षणम् | २५ | १६ — २० |
| ९ | इच्छा | २५ | २१ — २१ |
| १० | दानम् | २५ | २१ — २२ |
| ११ | भोजनम् | २५ | २२ — २३ |
| १२ | प्रज्वलनम् | २६ | २३ — २४ |
| १३ | क्रोधनम् | २६ | २४ — २५ |
| १४ | हवनम् | २६ | २५२ — ८ |

| | पृष्ठ | श्लोकाः |
|---|---|---|
| १५ शयनम | २७ | २८–२६ |
| **उपसर्गवर्गे—** | | |
| उपसर्गसंग्रहः, निपातसंग्रहश्च | २७ | १ – १४ |
| **ऐकपादिकवर्गे—** | | |
| १ द्वाषष्टिपदानि | ३० | १ – ६ |
| २ चतुरशीतिपदानि | ३० | ६ – १३ |
| ३ द्वात्रिंशशतपदानि | ३१ | १३ – २७ |
| **ऐकपादिकार्थवर्गे—** | | |
| १ द्वाषष्टिपदानामर्थाः | ३४ | १ – २६ |
| २ चतुरशीतिपदानामर्थाः | ३७ | ३० – ६७ |
| ३ द्वात्रिंशशतपदानामर्थाः | ४२ | ६८ – १२८ |
| ४ दशानवगमोदाहरणानि | ४६ | १२६ – १४३ |
| ५ द्विपदैकार्थसंग्रहः— | ५२ | १ – ४ |

| | | पृष्ठ | श्लोकाः |
|---|---|---|---|
| **अनेकार्थवर्गे-** | | | |
| १ | द्व्यर्थसाधारणपदानि | ५३ | १ – ५४ |
| २ | अनेकार्थशब्दाः | ५५ | – ६० |
| ३ | अनेकार्थधातवः | ६३ | १ – ८ |
| **बृहद्देवतावर्गे—** | | | |
| १ | प्रधानदेवतानिर्विचारः | ६५ | १ – २० |
| २ | अग्निभक्तयः | ६७ | २१ – ३६ |
| ३ | इन्द्रभक्तयः | ६० | ३६ – ५६ |
| ४ | सूर्यभक्तयः | ६२ | ५६ – ६६ |
| ५ | अग्निनामानि पञ्च | ६४ | ६६ – ७६ |
| ६ | इन्द्रनामानि षड्विंशतिः | ७६ | ७६ – १०६ |
| ७ | सूर्यनामानि नव | २ | १०६ – १२० |
| ८ | वर्गसंग्रहः कविपरिचयश्च | ,, | १ – ६ |


इति शुभम् ।



ॐ तत्सत् ।

ऋग्यजुःसामभिस्तत्त्वं निर्दिशन् मर्वतः सुखम् ।
पवर्तयन् ज्ञानरूपी भगवान् मे प्रसीदतु ॥ १ ॥

वेदमन्त्रस्तुताः सर्वा निर्दिश्यन्तेऽथ देवताः ।
सोमपास्तु त्रयस्त्रिंशत् त्रयस्त्रिंशदसोमपाः ॥ २ ॥

आदित्या वसवो रुद्रा विश्वेदेवगणावपि ।
प्रजापतिवषट्कारौ वाश्विनौ वेति सोमपाः ॥ ३ ॥

प्रयाजाश्चानुयाजाश्चाक्षयाजाश्चेयसोमपाः ।
एकादशक्रमेणैते भूमौ मध्ये दिवि स्थिताः ॥ ४ ॥

अथाग्निरिन्द्रवायुश्चादित्यश्चेति प्रधानतः ।
देवतास्तिस्र एवैताः पृथ्वी-मध्य-द्यूस्थिताः ॥ ५ ॥

आदित्यस्यादित्या, रुद्रा इन्द्रस्य, वसवोऽग्नेः, ।
अथेदवा अथ मरुतो देवविशो रुद्रपुत्राश्च ॥ ६ ॥

अथवेन्द्रस्य तु मरुतो, रुद्राः सोमस्य, वसवोऽग्नेः ।
आदित्या वरुणस्य तु गणिनः सहत्रामिनो देवाः ॥ ७ ॥

द्रविणोदा जातवेदा वैश्वानर इमेऽग्नयः ।
पार्थिवा उत्तरत्रापि प्रयोगो दृश्यते क्वचित् ॥ ८ ॥

द्वादश आप्रिय एता, बर्हिर्द्वारस्तनूनपादिध्मः ।
ईल उषासानक्ता, स्वाहाकृतयो नराशंसः ॥ ९ ॥

दैव्या होतारा अपि, तिस्रो देवीर्वनस्पतिस्त्वष्टा ।
एषामभिधेयार्थे मतभेदो दृश्यते विदुषाम् ॥ १० ॥

अथ सत्त्वानि वर्ण्यन्ते पृथिव्यायतनानि हि ।
अश्वः शकुनिमण्डूकावत्तो ग्रावा नरस्तुतिः ॥ ११ ॥

वृषभो दुग्धो नद्य आप ओषधयः पितुः ।
रात्रि-श्रद्धा-पृथिव्यप्वारण्यान्यग्नायि चेत्यपि ॥ १२ ॥

रथ-दुन्दुभि-हस्तघ्ने-षुधी-षु-ज्या-धनुः-कशाः ।
अभीषु-कवचादीनि युद्धोपकरणानि च ॥ १३ ॥

शुनासीरौ हविर्धाने मुसलोलूखले तथा ।
देवी ऊर्जाहुती, देवी जोष्ट्री, आर्न्ती च रोदसी ॥१४॥

विपाट्शुतुद्र्यावितस्तौ द्वन्द्वान्यन्यानि यान्यपि ।
इति षट्त्रिंशदुक्तानि स्तुयन्ते यानि भूरिशः ॥ १५ ॥

नद्यो नद, सुषोमा चार्जीकीया च वितस्तिका ।
असिक्नी च परुष्णी च शुतुद्री च सरस्वती ॥ १६ ॥

गङ्गा च यमुना चेति स्तूयन्ते तत्र तत्र हि ।
सिन्धुर्विपाट् वितस्ता च चन्द्रभागा इरावती ॥ १७ ॥

शतद्रुरिति चैतासामादितो लौकिकाभिधाः ।
अन्त्यास्तिस्रः प्रसिद्धाख्या उक्ता एतास्तु भूगताः ॥ १८ ॥

## इति भूमिष्ठा देवताः ॥

वायुर्वरुणारुद्रेन्द्राः पर्जन्योऽथ बृहस्पतिः ।
वास्तु-क्षेत्र-ब्रह्म-वाचां पतयोऽपांनपाद् यमः ॥ १९ ॥

कः सरस्वान् विश्वकर्म्मा मित्र-तार्क्ष्यक मन्यवः ।
दधिक्राः सविता त्वष्टा वातोऽग्निरिति मध्यगाः ॥ २० ॥

श्येन-प्रजापति-सुपर्ण—पुरूरवोऽहि-
विश्वानरा निधन-धातृ-विधातृ-सोमाः ।
एतेऽपि पूर्ववदिहापि च हव्यभाजो
वेनोऽसुनीतिर्ऋभव इन्दुरिमे त्वहव्याः ॥ २१ ॥

मरुतो रुद्राः पितरो भृगवोऽङ्गिरसोऽप्यथर्व ऋभवः स्युः ।
अथ च वशिष्ठा आप्त्या एता गणदेवतास्तत्र ॥ २२ ॥

अदितिः सरमा पृथिवी, राकाऽनुमतिः कुहूः सिनीवाली ।
अघ्न्या सरस्वती वाग्, गौरी गौरुर्वशी यमीन्द्राणी ॥२३॥

धेनुरिलोषाः पथ्यास्वस्तिर्वै रोदसी, स्त्रियस्त्वेताः ।
एते सर्वे देवा मध्यस्थाना विनिर्दिष्टाः ॥ २४ ॥

## इति अन्तरिक्षस्था देवताः ।

अथ देवा द्युस्थानाः, सविता भगस्त्वष्टार्यपूषणो विष्णुः ।
विश्वानरोऽथ वरुणः,केशि-वृषाकपि-यमै-कपात्सिन्धु २५

दध्यङ्ङथर्वमनवोऽथ सप्तऋषयो वसुश्च नासत्यः ।
दस्रोऽपि त्वष्टोषा वृषाकपायी–सरण्यु–सूर्य्याश्च ॥ २६ ॥

धाता मित्रो वरुणोऽर्य्यमा भगोंऽशुर्विवस्वांश्च ।
इन्द्रश्चादितिपुत्रास्त्वष्टृ सवितृ-पूष-विष्णवोऽप्युक्ताः॥२७॥

सप्तर्षयोऽथ देवा विश्वेदेवाश्च साध्यदेवाश्च ।
द्युस्थानानां संज्ञाः प्राणानां वाथ रश्मीनाम् ॥२८॥

अग्निश्चेन्द्रश्चादित्यरश्मयो वासवाः कथिताः ।
इन्द्राणीवरुणान्यग्नाय्याद्या देवपत्न्यः स्युः ॥ २९ ॥

अग्निर्वरुण आदित्य इन्द्र आदित्यरश्मयः ।
यज्ञः सोमोऽश्विनौ वाचश्चेत्यतिस्तुतयो मताः ॥ ३० ॥

पितरः प्रायशोऽथर्व–ऋभुभृग्वङ्गिरोगणाः ।
आप्त्या नामर्षयस्त्रेधा एकताश्च द्वितास्त्रिताः ॥ ३१ ॥

केशिनः कथिता अग्निर्वायुः सूर्य्य इति त्रयः ।
प्रजापतय उद्दिष्टाः सूर्य्यसंवत्सरादयः ॥ ३२ ॥

भारतीडासरस्वत्यस्तिस्रो देव्य उदाहृताः ।
दिवि भुव्यन्तरिक्षे च क्रमेण निवसन्ति याः ॥ ३३ ॥

इति दिविष्ठा देवताः ॥

इति दैवतवर्गः १

---

# द्व्यवर्गः २

द्यावापृथिव्यौ—

स्वधे पुरन्धी धिषणे रोदसी सदसी मही ।
अही गभीरे गम्भीरे ओणयौ चम्वावथादिती ॥ १ ॥
अम्भसी नभसी क्षोणी सध्रनी बहुले अपि ।
उर्वी पृथ्वी च रजसी पाश्वौ घृतवती अपि ॥ २ ॥
दूरे अन्ते अपारे च बृहती रोधसी अपि ।
नप्त्रौ द्यावापृथिव्योस्तु नामान्येतानि सन्ति हि ॥ ३ ॥

पृथ्वी—

भूर्भूमिरवनिः पूषा गातुर्गोत्राऽदितिः क्षितिः ।
क्षोणिः क्षामा मही पृथ्वी गौरिला निर्ऋतीरिपः ॥ ४ ॥

उर्वी गमा जमा क्ष्मा क्ष्मा क्ष्मा पृथिव्या अभिधा इमाः।

हिरण्यम्—

हेम चन्द्रमयो रुक्मं हिरण्यममृतं मरुत् ॥ ५ ॥
लोहं पेशो जातरूपं कनकं भर्म्म काञ्चनम् ।
कृशनं दत्रामित्येता हिरण्यस्याभिधा मताः ॥ ६ ॥

अन्तरिक्षम्—

वियदम्बरमाकाशं व्योम पुष्करमध्वरम् ।
भूः स्वयम्भूः पृथिव्यापोऽन्तरिक्षं धन्वबर्हिषी ॥ ७ ॥
अध्वा समुद्रः सगरोऽन्तरीक्षस्याभिधा इमाः ।

किरणाः—

खेडा तु किरणा गावो रश्मयोऽभीषवो वनम् ।
गभस्तयो दीधितयः साध्या उस्रा मरीचिपाः ॥ ८ ॥
सुपर्णाः सप्तऋषयो मयूखा वसवोंऽशुषु ॥ ९ ॥

दिशः—

हरितः कक्कुभः काष्ठा आष्ठा व्योमोपरा दिशः।
आता आशा दिशामाख्या एताः प्रायेण भूमनि ॥ १० ॥

दिनम्—

भानुर्घर्म्मो घृणो घंसो वासरं स्वसरागि च ॥
वस्तोर्दिनं दिवा द्युद्यौर्घविद्यवि दिवेदिवे ॥ १.२॥

उषाः—

अहना द्योतना श्वेत्या वाजिनी वाजिनीवती ।
ओदनी भास्वती सुम्नावरी चित्रा मघाऽर्जुनी ॥ १.३ ॥
विभावरी सूनरी च सूनृता सूनृतावती ।
सूनृतावर्य्यरूषी स्यादरुषीत्युषसोऽभिधाः ॥ १.४ ॥

रात्रिः—

नक्ताऽक्तुः शर्वरी श्यावी शोकी मोकी हिमा रजः ।
पयः पयस्वती त्विष्टी तमोऽसिक्नी तमस्वती ॥ १.५ ॥
दोषोर्म्योध उधा राम्या घृताची शिरिणा क्षपा ।
यम्या नम्येति नामानि रात्र्या इति विभावय ॥ १.६ ॥

मेघः—

अद्रिर्गोत्रो गिरिर्ग्रावा पर्वतोऽश्मा व्रजो बलः ।
अभ्रं बलाहको मेघो वराहः शम्बरश्चरुः ॥ १.८ ॥

रौहिणो रैवतो वृत्रः फलिगाह्युपरोपलाः ।
वृषन्धिरसुरः कोशश्चमसो दृतिरोदनः ॥ १९ ॥
वलिशानः पुरुभोजा अश्नो मेघाभिधा इमाः ॥ २० ॥

जलम्-

इदं जलं जलाषं वार्वारि तेजः स्वधा वनम् ।
गभीरं गम्भरं शुक्रं कृपीटं गहनं वपुः ॥ २१ ॥
तूयं तोयं शम्बरं सत् पवित्रममृतं घृतम् ।
अभ्वमम्बु हविः पूर्णं सर्वं सर्पिरपोऽक्षितम् ॥ २२ ॥
नामान्नं बर्हिरीमाप इन्दुर्हेम महो महत् ।
स्वःसर्गाः सदम सदनं सुखं क्षत्रं शुभं यशः ॥ २३ ॥
भविष्यद् भुवनं भूतमृतं सत्यं रयिः प्रयः ।
रसः सरः सहो व्योम यादुरोजो यहः शवः ॥ २४ ॥
तुग्र्या सतीनं सर्णीकं स्वृतीकं भेषजं क्षपः ।
आवया अक्षरं स्रोतस्तृष्निर्जाम्यायुधान्यहिः ॥ २५ ॥
मुक्षेम धरुणं जन्म क्षीरं नीरं वुसं विषम् ।
वृषकं वर्बुरं रेतः पुरीषं पिप्पलं मधु ॥ २६ ॥

कशः कंबन्धं सलिलं धस्मन्वदुदकं सिरा ।
स्रोदःस्रदुम नभोऽम्भोऽर्णा अरारिन्दानि जामिवत् ॥ २७ ॥
ऋतस्य योनिर्योनिः कं जलनामानि भावय ।

नदी—

यव्यां अवनयः सीराः स्रोत्याःखा धुनयोऽग्रुवः ॥ २८ ॥
एन्यो रुजाना हरितः सरितो रोहितोऽजिराः ।
स्वादो अर्णा रोधचक्रा उर्व्यो वर्य्यश्च सस्रुतः ॥ २९ ॥
नभन्वा वत्तणा वध्वः कुल्या अर्णाश्च सिन्धवः ।
हिरण्यवर्णाः पार्वत्य इरावत्यश्च मातरः ॥ ३० ॥
ह्रस्वत्यस्तरस्वत्यः सरस्वत्यः स्रवन्तिकाः ।
ऊर्जस्वत्यः पयस्वत्यो रोधस्वत्यश्च निम्नगाः ॥ ३१ ॥
भास्वत्यो नद्य इत्येवं नदीनामानि भावयेत् ।

अश्वाः—

अत्यो वाजी हयः ससिरर्वौच्चैःश्रवसोऽरुषः ॥ ३२ ॥
दधिक्रावा दधिक्राश्च दौर्गह-ब्रध्न-वह्नयः ।
तार्क्ष्यो मांश्चत्व आशुश्च पैद्व एतग्व एतशः ॥ ३३ ॥

अश्वाः सुपर्णा हंसासः श्येनासोऽव्यथयो नरः ।
ह्वार्य्याः पतङ्गा इत्येते सामान्येनाश्ववाचिनः ॥ ३४ ॥

*

पूष्णोऽजाः, सवितुः श्यावाः, विश्वरूपा बृहस्पतेः, ।
अश्विनो रासभद्वन्द्वं, पृषत्यो मरुतामपि, ॥ ३५ ॥
हरी इन्द्रस्य, हरितस्त्वादित्यानामथोषसाम ।
गावोऽरुणयोऽथ नियुतो वायोर्वह्नेस्तु रोहितः ॥ ३६ ॥

## इति दिव्यवर्गः ।

## मनुष्यवर्गः ३

### मनुष्यः—

जगतस्तस्थुषो मर्त्या मर्ता मर्य्या धवा नरः ।
द्युवस्तुर्वशा व्राता जन्तवः क्षितयो विशः ॥ १ ॥
मनुष्या नहुषः कृष्टिहरिचर्षणयो नराः ।
विवस्वन्तः पञ्चजना यदवः पूरवोऽनवः ॥ २ ॥
आयवः पृतना एते मनुष्यार्थाभिधायकाः ।

मेधावी—

मन्धाता मतयो मनश्चिदुशिजो वेनो विधाता विपः
कीस्तासोऽपि विपन्यवोऽपि मतुथा आकेनिपः केनिपः ।
धीरो विप्रविपश्चिताभृकवी अदृधासयो वाघतो
मृत्सः कण्वमनीषि-वेधस इमे विग्रो नवेदाः समाः ॥३॥

स्तोता—

रेभस्तामुर्नदो नादः सूरि-स्तुप्-कारु-कीरयः ।
छन्दो रुद्रः कृपण्युर्गौर्जरिता स्तोतृवाचकाः ॥ ४ ॥

ऋत्विक्—

मरुताः कुरवो वृक्तबर्हिषोऽपि यतस्रुचः ।
मवाधो वाघतो देवयवो मरुत ऋत्विजः ॥ ५ ॥

अध्यक्षः—

अर्यो नियुत्वान् राष्ट्री स्युरीश्वरार्था इनः पतिः ।

चौरः—

तक्का रिक्का रिपू रिभ्वा रिहायास्तायुनस्करौ ॥ ६ ॥

नृपुस्तृका वृको रिह्वा हुराश्चिच्च मलिम्लुचः ।
अघशंसो मुषीवांश्च वनर्गुः स्तेनवाचकाः ॥ ७ ॥

अपत्यम्—

तुक् तोकं तनयस्तोक्म तक्मापत्यं नपात् प्रजा ।
वीजमप्नो गयः शेषो यहुर्जाः सूनुरित्यपि ॥ ८ ॥

## इति मनुष्यवर्गः ॥ ३ ॥

# धर्म्मवर्गः ४

महान्—

महिषस्तविषस्तवसो रभसः ककुहो महद् बृहद् ब्राधन् ।
ब्रध्नोऽद्भुतं विरप्शी बंहिष्ठो वर्हिषद् विहायाश्च ॥ १ ॥
अभ्वोऽम्भृणो गभीरो माहिन ऋष्वो विवक्तसे तुक्तः ।
उक्षित उक्तभुक्ता ववक्षिथो यह्व—इत्यमी महति ॥ २ ॥

क्षुद्रः—

क्षुल्लकेऽल्प ऋहन् ह्रस्वः प्रतिष्ठा मायुकः कृधु ।
अर्भको वभ्रको दभ्रं निघृष्वस्तृषमः समाः ॥ ३ ॥

बहुः—

उरु पुरु शश्वद् विश्वं परीणसा व्यानशिः कुवित्सलिलम् ।
तुवि च शतं च सहस्रं भूरि च बहुवाचका एते ॥ ४ ॥

समीपः—

आसात् स्यादन्तमीके च तुर्वशे तडिदम्बरम् ।
आके उपाके अर्वाके अवमे उपमेऽन्तमम् ॥ ५ ॥
अन्तिकार्था इमे प्रोक्ता अथ दूरार्थकाः परे ।

दूरः—

आरे आके पराके च परावैश्च परावतः ॥ ६ ॥

पुराणः—

प्रत्नयाः प्रदिवोऽह्नाय पूर्व्यं भवं सनेमि च ।

नवीनः—

इदानीं नूतनं नूत्नं नव्यमिदा इति ॥ ७ ॥

अन्तर्हितः—

निएयं सस्वरपीच्यं च प्रतीच्यं सनुतर्हिरुक् ।
पुराणे षट्, नवीने षट्, निर्णीतान्तर्हितस्य षट् ॥ ८ ॥

सुन्दरः—

अनवद्योऽनभिशस्तः पाकोऽनेद्योऽप्यनिन्द्य उकृष्योऽपि।
वयुनमनेमाऽस्रेमा वामस्तुनीथौ प्रशस्यनामानि ॥ ९ ॥

रूपम्—

पेशः पिष्टं वपुरपुर्वन्निर्वर्पोऽर्भतिर्मर्मरुत् ।
प्सरः प्सुरप्सः कृशनमरुषं शिल्पमर्जुनम् ॥ १० ॥
अप्रस्ताम्रं च निर्णिक् च रूपनामान्यमूनि हि ।

हस्तः—

अथ बाहू च भुरिजावंशीशू च विनङ्गृसौ ॥ ११ ॥

त्तिपस्ती च गभस्ती च भरित्रे चायती च तौ ।
अग्रवाना च्यवाना च करस्नौ शकरी करे ॥ १२ ॥

अङ्गुलयः--

अरण्योऽग्रुवो त्रिशः शर्य्या रशना धीतयो धुरः ।
अथर्य्योऽवनयः कक्ष्या योजनानि विपः त्तिपः ॥ १३ ॥
स्वसारोऽभीशवः शाखा जामयश्च सनाभयः ।
गभस्तयो दीधितयो योक्त्राणि हरितस्तथा ॥ १४ ॥

कर्म—

कर्त्तोः कर्त्वं करन्ती ऋतु-करुण-करः कर्तवै कर्तुमप्नः
कृत्वी चक्रन् कीरक्रद् व्रत-करण-शची- शक्तयः कर्वरं धीः ।
विष्टी वेषश्च वेपोऽप-इति शिमि-शमी-शक्म शिल्पं च दंसो
नामान्येतानि वेदे कलयति कुशलः कर्म्मणि व्यत्ययाच्च ॥

यज्ञः—

यज्ञो वेनोऽध्वरो मेधो विदथः सवनं मखः ।
इष्टिर्होत्रा देवताता विष्णुरिन्दुः प्रजापतिः ॥१६॥
धर्म्म नार्य्यः पञ्चदश यज्ञनामानि चक्षते

## सखम्—

सखे सखसृतं सत्रा श्रदित्थाद्धा वडित्यमी ॥ १७ ॥

## वाक्—

श्लोको घोषो गणो वाणः स्वनः शब्दः स्वरः सरः ।
धारा गौरी गौरिला गीर्गान्धर्वी भारती गणा ॥ १८ ॥
गाथा गभीरा गम्भीरा मन्द्रा मन्द्राजनी नना ।
वाशी वाणी च वाणीची मूर्य्या स्वाहा सरस्वती ॥ १९ ॥
नौर्धेनुर्धिषणा धेना मेना मेडिः कशा निवित् ।
होत्रा ऋक् धमनिर्नाडीर्म्मायुकाकुदुपब्दयः ॥ २० ॥
वागनुष्टुप् शची गल्दा वल्गुर्वग्नुर्विपा पविः ।
सुपर्णी वक्कुरो जिह्वा मही ग्राऽदितिरुत्तरम् ॥ २१ ॥
एतानि सप्तपञ्चाशद्वचो नामानि चक्षते ।

## प्रज्ञा—

केतुः केतश्चेताश्चित्तं माया शची क्रतुर्वयुनम् ॥ २२ ॥
धीरसुरेवमभिख्या प्रज्ञानामानि कथ्यन्ते ।

सुखम्---

शिम्बाता शनरा शर्म्म शिवं शेवं च शेवृधम् ॥ २३ ॥
स्योनं सुम्नं शुनं शूषं जलाषं भेषजं मयः ।
सुगम्यं शग्मं शातपन्ता स्यूमकं सुदिनं तथा ॥ २४ ॥
शिल्गुः शं कमिमे शब्दाः सुखार्था एकविंशतिः ।

बलम्—

ओजः पाजः शवः शर्द्धस्तृत्तं त्वत्तस्तनस्तरः ॥ २५ ॥
शूषं शुष्णं वीडु शुष्मं नृम्णं च्यौत्नं यहः सहः ।
दत्तो वर्गो वधो बाधो बृजिनं वृक् च शम्बरम् ॥ २६ ॥
स्यन्द्रासो द्रविणं पौंस्यं धर्णिसस्तविषी तथा ।
मज्मना बलनामानि पदार्थज्ञाः प्रचक्षते ॥ २७ ॥

क्रोधः---

हरो ह्वरो हृणिर्जूर्णिरेहो हेडो व्यथिस्त्यजः ।
भामो मन्युश्च तपुषी क्रोधनामानि मानय ॥ २८ ॥

वज्रम्---

मेनिर्नेमिर्नमः कुत्सः कुलिशः सायकस्तुजः ।

सृको वृको नधो वज्रः स्वधितिः परशुः पविः ॥ २६ ॥
हेतिर्दिद्युत्तिग्ममर्को वज्रनामानि भावय ।

युद्धम्—

विवाग् विखादो नदतुः मधने च महाधने ॥ ३० ॥
पृतनाः पृतनाज्यं च पृत्ते पृत्सु खले खजे ।
स्पृधो मृधो भरे मीढ्वे पौंस्य आक्रन्द आहवे ॥ ३१ ॥
आजावाणौ वाजसातौ शूरसातौ च सत्र च ।
वृत्रतूर्य्ये समर्य्ये च समेहे च समत्सु च ॥ ३२ ॥
समीथे सङ्गथे सङ्गे सङ्गमे संयुगेऽज्म च ।
समितिः समनं सङ्काः संख्ये संयच्च संवतः ॥ ३३ ॥
समनीके समीके चाभीके समरणे रणः ।
ममत्यं नेमधिता वाजे सङ्गामवाचकाः ॥ ३४ ॥

धनम्—

रेक्णो रिक्थं मघं वेदो वरिवो बन्धुरिन्द्रियम ।
श्वात्रं त्तत्रं रयी रत्नं भगो मीढुं गयस्तना ॥ ३५ ॥

रायो राधो यशो मेधा भोजनं द्रविणं वसु ।
द्युम्नं नृम्णं वृतं वृत्रं श्रवो ब्रह्म धनार्थकाः ॥ ३६ ॥

गौः—

अघन्योस्त्रियोस्त्रा जगती शक्करीलादितिर्म्महो ।
अहीति नव नामानि गवामित्यवधारय ॥ ३७ ॥

अन्नम्—

वाजोऽन्धः क्षु सुतः सिनं पितुरवो ब्रह्म स्वधा सूनृता
न्नञ्चार्कः ससमायुरूर्गिषमिरा नेमो नमः क्षुद्रयः ।
पृन्तो धासिरिला यशो रसपयोवर्चःप्रयांसि श्रवः
कीलालं क्षुमदेव सीनमिति वा पाजोऽपि वाऽन्नार्थकाः ३८

गृहम—

अस्तं पस्त्यं नीडं, कृत्तिः कृदरो गयो गर्त्तः ।
दुर्य्याः सद्म दुरोणे, शरणं स्वसराणि योनिरमा ॥ ३९ ॥
छाया छर्दिश्छादिरपि, वर्म्म च हर्म्यं वरूथं च ।
अज्म च शर्म्म दमे गृहनामानि त्रीणि विंशतिश्चेति ॥४० ॥

## कूपः—

कूपे कर्तः कातुः खातः काटोऽवटोऽवतो वत्रः ।
केवट उत्सः कारोतरः क्रिविः सूद ऋश्यदः कुशयः ॥४१॥

## प्रज्वलनम्—

ज्वलतो नामधेयानि शृङ्गं स्यात् कलमलीकिनम् ।
जञ्जगाभवदित्येवं मलमलाभवदित्यपि ॥ ४२ ॥
अर्चिः शोचिस्तपस्तेजो हरो हरिणवृणी जमत् ।

## शीघ्रः—

त्विषार्थे तुज्यमानास्तूतुजानो नु तूतुजिः ॥ ४३ ॥
भुरण्युरजिरं जीरा जूर्णिस्तूर्णिः शु साचिवित् ।
आशु प्राशुः शीभमोघं मक्षु शूर्ता तूषु द्रवत् ॥ ४४ ॥
वातरंहाः शूघ्रनास्तूयं ताजद् द्युगद् युगत् ।
अञ्जास्तरणिरित्येते—धर्म्मवर्गोऽयमीरितः ॥ ४५ ॥

## इति धर्म्मवर्गः ४

# क्रियावर्गः ५

लोठते कसति लोटतेऽयते स्यन्दते स्यमति वर्ततेऽवति ।
मृंसति स्रवति सर्पतीषति ध्वंसति ध्रजति मार्ष्टि वञ्चति
कालयत्यतति गाति सश्चति श्वोतति भ्रमति पेलयत्यपि
कण्टति स्वरति सर्क्षते सिसर्त्त्यार्य्यति ज्रयति हर्यतीङ्गते
नक्षति क्षियति सक्षतीषति म्यक्षति त्सरति जेहतेऽर्दति
मर्दति ध्रपति हन्ति जिन्वति ध्राति वाति पवते भुरण्यति
द्राति याति पततीन्वति द्रमत्येजति द्रवति वेति वेनति
प्साति सेधति जिगाति रेजति द्रूढ़ाति ध्रति ऋणोति ऋण्वति
रीयतेऽरुषाते सीयते धवत्येति धावति तुरीयतीति च
ऋच्छति व्रजति डीयतेऽनिति क्षोदति प्लवति युध्यतीति च
इयर्ति ईर्त्ते यतते रथर्याति विषिष्टे योषिष्टे रिणाति दीयति
इयक्षतिक्षुम्पतिरंहतिक्षिणोत्यृणोतिजङ्घन्तिजगन्तिगन्तिच
पिस्यति;क्विस्यति,मिस्यति दध्यति दधनोति धन्वति ध्रुवति
प्रवते प्लवते च्यवते कवते गवते च नवते च ॥ ७ ॥
चतति च चसति च शवति च हनति च वहते मिनाति धमतीति
रजति च लजति च तक्राति श्थाक्षति नसते मिनोति फणतीति

जवति च जसति च जमति च गमति जगायादगन्नजगन् ।
अयथुः ष्वः कति हन्ताद् हयति हयन्तादथागनीगन्ति ॥९॥
मस्मति सिस्मति हम्मति हम्यति दभ्नोति कणति नख्यति च
रूढति राति जगाति द्रुम्मत्याद्या गतिक्रिया बोध्याः॥ १०॥

व्याप्तिः—

आनडात्ताण आपानोऽप्यानशे नशदश्नुते ।
नत्तनीन्वसश्चाष्ट दश व्याप्तिक्रिया इमाः ॥ ११ ॥

ईशनम्—

ऐश्वर्य्यार्था राजतिरज्यति त्तयति पस्यते ।

अध्येषणा—

परिस्रव पवस्वाभ्यर्षाशिषोऽध्येषणाक्रियाः ॥ १२ ॥

अर्च्चा—

अर्चति गायति रेभति नदति पपृत्ता गृणाति गूर्द्धयति ।
वल्गूयति शशमानो जरते रञ्जयति मन्यते मदति ॥ १३ ॥

शंसति रसति पनस्यति पनायते भनति वेनति स्तौति ।
नौति च यौति च रौति च रजयति वाजयति पूजयति॥१४॥
स्वदति स्वरति स्तोभति पृच्छति जल्पति च कल्पते धमति
पणते रिहति पणायति सपति कृपायति कृपण्यति ह्वयते ।
मन्त्रयते मन्द्रयते छन्दति च च्छद्यते च महयति च ।
एतेऽथ वन्दते चाथ भन्दते चाथ मन्दतेऽर्चयर्थाः ॥ १६ ॥

परिचर्या—

परिचरणे तु इरज्यति सपति विवासति ऋणाढ्ये ऋध्नोति॥
ऋच्छति किञ्च सपर्यति विधति नमस्यति दुवस्यति च ॥

याचना—

यन्तारः पीपरत् पूर्द्धि मदेमहि मनामहे ।
मन्महे मायते यामि यन्धीषुध्यति चेमहे ॥ १८ ॥
मिमिड्ढि च मिमीहीति रिरीहीति रिरिड्ढि च ।
दाद्धि शग्धीत्यमी शब्दाः श्रूयन्ते याचनक्रियाः ॥ १९ ॥

## ईक्षणम्—

चष्टे विचष्टे चिक्यच्च चाकनच्चावचाकशत् ।
विश्वचर्षणिराच्चक्ष्म विचर्षणिरतीक्षणे ॥ २० ॥

## इच्छा—

वष्टि वेति वनोति वेनति कानिषत् कनतीति च
च्छन्त्सदुश्मासि वश्मि वेशति मन्यते जुषतेऽपि च ।
चाकनच्चकमान आचक एव हर्य्यति वाञ्छति
व्याहरन्ति हि कान्तिकर्म्माणि कोविदा उशिगित्यपि ॥२१॥

## दानम्—

तुञ्जति शिक्षति दाशति दाति च दासति च राति रासति च
अपि च पृणाति च पृणाति च मंहत एते हि दानकर्म्माणः२२॥

## भोजनम्—

बब्धां बभस्त्यावयति भसथो वेति भर्वति ।
ह्वरत्यविष्यन् वेवेष्टि वप्सतीत्यत्तिकर्म्माणि ॥ २३ ॥

प्रज्वलनम्—

भ्राजि-भ्राशी भ्राश्यतिश्च मन्दि-भान्दि-द्युति-ज्युति ।
रुक् शोचती दीदयति द्युमज्ज्वलतिकर्म्मकाः ॥ २४ ॥

क्रोधनम्—

रेडि-हेडी कम्प-भोजी भामिर्भ्रेषति दोधति ।
हृणीयते च भ्रीणाति वनुष्यति क्रुधिक्रियाः ॥ २५ ॥

हननम्—

दभ्नोति धूर्वति वृणक्ति ताडिच्छृणाति
द्रूणाति ताढि नभते धमति स्तृणाति ।
रम्णाति कृणत्ति मिनाति मिनोति शम्ना-
त्याखण्डलार्दयतियातयती वियातः ॥ २६ ॥
स्नथयति तृणेढि वृश्चति
निवपन्तु श्वसिति कृन्तति ध्वरति ।
स्नेहयति वर्हयत्यव-
तिरति स्नेहति निनोशते श्वसति ॥ २७ ॥

श्लथति श्रथति स्फुरति
स्फुलति च निवहयति जूर्वति च ।
आतिरदर्दति मर्दति
वधकर्म्माणो बुधैरुदिताः ॥ २८ ॥

शयनम्—

द्वौ तु स्वापितिकर्म्माणौ सस्ति च स्वापितीति च ।
इत्येवं पञ्चदशभिः क्रियावर्गोऽयमीरितः ॥ २९ ॥

## इति क्रियावर्गः ५

## उपसर्गवर्गः ६

आ इत्यर्वागर्थे, अपरेति प्रातिलोम्यमेनस्य ।
अभिरभिमुखतां, प्रतिरिति तद्विपरीतं समाचष्टे ॥ १ ॥

अतिस्तु पूजितमर्थं, प्राहतुरनयोर्विपर्य्ययं निर्दुः ।
अवनी विनिग्रहार्थौ, वुदिति प्रतिलोमतामनयोः ॥ २ ॥

एकीभावं समिति,व्यपेति तस्माद्विपर्य्ययं ब्रूतः ।
अधिरर्थद्वयमाहोपरिभावं तद्वदैश्वर्य्यम् ॥ ३ ॥

सादृश्यापरभावं संसर्गोपजन— सर्वतोधावान् ।
क्रमतेऽन्विति चापांति च तद्वदुपांति च परांति च ब्रूत ॥ ४ ॥

इत्युपसर्गा उक्ता विंशतिरेषां कचेतरेऽप्यर्थाः ।
अथ च निपाताः केचिद्दृश्यन्ते ये त्रिधाऽर्थभेदेन ॥ ५ ॥

उपमायामिव, ननु, चिद्, नेति निषेधेऽपि पूर्वतः पठितः ।
पूजावकुत्सयोश्चेद्धेत्वपदेशानुपृष्टयोरपि नु ॥ ६ ॥

अर्थोपसङ्ग्रहार्थाः, समुच्चये चेति आ इति च ।
वेति विचारे चार्थे, विनिग्रहे प्रथमवाक्यगावह्हौ ॥ ७ ॥

परवाक्यगो विनिग्रह, उ अयं पदपूरणोऽपि स्यात् ।
किल इति विद्यातिशये, न ननुभ्यां संप्रयुक्तमनुपृष्टे ॥ ८ ॥

त्वदिति समुच्चयवाची, हीति न्वर्थेऽप्यसूयायाम् ।
मेति निषेधे, खल्विति तत्र च पदपूरणे च स्यात् ॥ ९ ॥

नूनं विचिकित्सायां पदपूर्तौ चाथ शश्वदिति ।
अनुपृष्टे तु पुरस्तादुपरिष्टादस्वयंपृष्टे ॥ १० ॥

सीमिति परिग्रहे पदपूर्तौ चेत्येवमितरेऽपि ।
पदपूरणानि तु विदुः कमिदीमिति ये च पूर्वनिर्दिष्टाः॥११॥

इव ननु चिदु खलु नूनं घ कमित्सीमीमिमानि चान्यानि।
पदपूरणानि, नेदिति परिभयकेऽथानुपृष्टके तु नचेत॥१२॥

आकीं नकीं नकिर्माकिर्हिकमाहिकमाकृतम ।
नुकं सुकं नवैतानि व्यर्थान्युक्तिप्रपुष्टये ॥ १३ ॥

अन्ते था, वद, रूप–वर्ण-भूता, नु–न–चिदा–इव ।
यथा, तथा. लाक्षणिका उपमार्था उदाहृताः ॥ १४ ॥

## इत्युपसर्गवर्गः

# ऐकपादिकवर्गः ७

अथोच्यन्ते पदान्यत्र द्वेशते चाष्टसप्ततिः ।
दमूना मेहना मूषः शिताम जठरं जहा ॥ १ ॥
ईर्मान्तासः कायमानो द्रुपदे विद्रधे निधा ।
शीरं नसन्त नंसन्ते शिप्रे तितउ तुग्वनि ॥ २ ॥
मध्या कुरुतन व्यन्तः परितक्म्याअसद् रजः ।
सुविते दयते बाहो मन्द्र आहनसो हरः ॥ ३ ॥
इषिरेणेष्मणाः क्राणा अकूपारस्य दावने ।
लोधं वाशी नू च नूचिद्विपुणो मन्दिनेऽदितिः ॥ ४ ॥
शिशीते सुतुको जामिः पिता जसुरिरेरिरे ।
शंयोरमायुवोऽस्यास्या गातुस्तूताव दंसयः ॥ ५ ॥
सुमायणा गौश्च्यवनो जरते वियुते ऋधक् ।
चयसे जुह्वे चेति द्वाषष्टिपदसंहतिः ( ६२ ) ॥ ६ ॥

*

सस्निमन्धो वावशानो वाज्यं दूतो वनुष्यति ।
भन्दना आहनः सोमोअह्नाः स्वानं तरुष्यति ॥ ७ ॥

नद ऊतिर्हासमाने ससं षड्भिर्द्विता पविः ।
वाडिष्ठो त्रा वराहोऽर्कों धन्व वत्तः सचा सिनम् ॥ ८ ॥
पृथुज्रया असश्चन्ती शय्यां इत्था चिदाघृणिः ।
द्युम्नं पवित्रमाङ्गूषः काणुका शिपिविष्ट आ ॥ ९ ॥
तोदः स्वञ्चाः शमशा विष्णुरुर्वशी वयुनं वृकः ।
आपान्तमन्युस्तूर्णाशं गधिता गव्यमारितः ॥ १० ॥
वाजगन्ध्यं वाजपस्त्यं जोषवाकं निचुम्पुणः ।
कौरयाणस्तौरयाणः क्षुम्पं पादुः पदिः परि ॥ ११ ॥
हरयाणोऽप्यहयाणो निष्षपी तूतुमाकृषे ।
काकुदं केपयोंऽमत्रं वीरिटे चर्षाणिः स्रुणिः ॥ १२ ॥
शम्ब ईं सीमेनमनां समस्याच्छ कुटस्य च ।
अथर्व्यु मधिगुः कृत्तिः श्वघ्नी च स्वसराणि च ॥ १३ ॥
ब्रन्दी चेति पदानि स्युरशीतिश्चतुरुत्तरा (८४) ।

*

आशुशुक्षणि राशाभ्यः सललूकमलातृणः ।
कुणारुं कत्पयं काशिर्नक्षद्दाभं मत्रीमनि ॥ १४ ॥

ऋदूदर ऋदूपे किरस्कृधोयुरिसन्वती ।  ।
पुलुकामो भाऋृजीको रुजाना जूर्णिरोमना  ॥ १५ ॥
उपलप्राक्षिणी पाथः सप्रथाः कपना कृपा  ।
वृवदुक्थं प्रकलविद्वीरुधः शुरुधश्चनः  ॥ १६ ॥
शशमानः शाशदानः श्रायन्तः पचताऽग्रिया  ।
विदथानि विजामातुरीक्षे क्षोणस्य विक्षुहः  ॥ १७ ॥
अभ्यर्द्धयज्वा दुरितं स्तियानां तुर्वणिः स्तिपाः  ।
श्रुष्टी सोमानमोमासोऽमिनोऽमूरः किमीदिने  ॥ १८ ॥
सूप्रः शिप्रे सुशिप्रोऽक्रोऽमूर्तेमूर्तेऽप्रतिष्कुतः  ।
सुविदत्रः सुदत्रोऽम्यग् रंसु गिर्वणसेऽमतिः  ॥ १९ ॥
आशीरस्मे जारयायि यादृशिमन्नानुपक् सुमत्  ।
तुञ्जोऽमीवाऽमवानप्वा ततनुष्टिमिलीविशः  ॥ २० ॥
अंहुरो वक्रुरोऽसक्रां रुशदुल्वं रिशादसः  ।
निशृम्भा अनवायं च कियेधाश्च प्रतद्वसू  ॥ २१ ॥
गल्दया जल्हवोऽसामि कीकटेषु पराशरः  ।
शिरिम्बिठो वेकनाटान् बृंदं बुन्दोऽनवब्रवः  ॥ २२ ॥
हिनोतोराण उपसि दिविष्टिष्वभिधेतन  ।
जिन्वत्यजीगः कुलिशोऽनर्शरातिं क्रिविर्दती  ॥ २३ ॥

तुरीपं रास्पिनोऽमत्र ऋजुनीती ऋचीषमः ।
द्विवर्हा बर्हणा चाकन् जरूथं दृत ऋञ्जतिः ॥ २४ ॥
जबार्वनर्वा चोष्कूयमाणश्चोष्कूयते भृमिः ।
वतः पुरन्धिर्वाताप्यं रथर्य्यति करूळति ॥ २५ ॥
सदान्वे जञ्झतीदंयुः शरारुर्दन आधवः ।
त्विष्पितः स्याद्बर्बीसं च पदान्येतानि भावय ॥ २६ ॥
शब्दाः सन्दिग्धसंस्काराः संदिग्धार्था अनेकधा ।
त्विगृहीता निगमतः संगृह्यते प्रदर्शिताः ॥ २७ ॥

## इति ऐकपदिकवर्गः ॥ ७ ॥

# ऐकपदिकार्थवर्गः ८

एषां पदानां यानर्थान् भावयन्ति विपश्चितः ।
तानपीह प्रवक्ष्यामि यथावदनुपूर्वशः ॥ १ ॥

दमूना इष्यते दान्ते यस्य वाभिरुचिर्गृहे ।
यस्य दान्ते मनस्तस्मिंस्तथा दानमनस्यपि ॥ २ ॥

मेहना महनीयेऽर्थे धनादाविष्यतेऽथवा ।
न गृहेऽस्ति ममेत्यर्थे छन्दोगानां पदत्रयम् ॥ ३ ॥

मूषस्तु मूषिकायां स्युः शिताम गुदमुच्यते ।
केचिद्वदन्त्यपि श्यामे बाह्वोरपि यकृत्यपि ॥ ४ ॥

जठरं तूदरे सिद्धं जघानार्थे जह्नापदम् ।
ईर्म्मान्ताः पृथुजङ्घत्वात्सूर्य्याश्वाश्वेरितान्तकाः ॥ ५ ॥

यस्तु कामयमानः स्यात्कायमानः स उच्यते ।
कायमानश्चायमान इत्यप्यन्ये प्रचक्षते ॥ ६ ॥

द्रुपदं पादुकायां स्यान्निगडे वा द्रुमश्रये ।
विद्रधं तु भयानकस्थे व्यूढे वा विक्षतेऽपि वा ॥ ७ ॥

निधा पाशसमूहे स्याच्छीरोऽग्नावनुशायिनि ।
तथैवाशनशीलेऽपि शीरं केचित्प्रचक्षते ॥ ८ ॥

भवेदभिनमन्त्यर्थे नंसन्ते च नसन्त च ।
शिप्रे हनू नासिके ता चालन्यां तितउः स्मृतः ॥ ९ ॥
तुग्व तीर्थं नदीनां स्यात्स्नातुं यत्रावतीर्य्यते ।
मध्या मध्ये कुरुतनेत्यादिषूपजनोऽस्ति नः ॥ १० ॥
व्यन्तो वीधातुनिर्वृत्तो गतिप्रजननादिषु ।
पश्यत्सु गन्तृष्वश्नत्सु व्यन्त इत्यपि चक्षते ॥ ११ ॥
परितक्म्याऽभितोगन्त्र्यां रात्रौ वा केचिदूहिरे ।
अह्नाह्नं तत्र सदनादह्नसत् पाकशारिणी ॥ १२ ॥
रजस्तु ज्योतिरब्लोकासृगहर्वाचकं मतम् ।
सुवितं तु प्रसूते वा प्रजायां वाऽपि सुष्ठुगे ॥ १३ ॥
दनादानगतित्राणहिंसादाहविभक्तिषु ।
दयते पदमाख्यातं वाहः सोमेऽपि कथ्यते ॥ १४ ॥
वाहः स्तुतौ चर्म्मणि वा सोमाधिषवणात्मके ।
मन्द्र मदिष्णू विख्यातावथवापि मदिष्णुना ॥ १५ ॥
आहनाः स्याद्वध्रिनवान् हरस्तु रजसा समम् ।
मनस्त्वपेक्षासंपन्नमिषिरं प्रणिधीयते ॥ १६ ॥
इष्म इष्टिगतीच्छासु तद्योगादिष्मणो मताः ।

क्राणा भवन्ति कुर्वाणा अकूपारस्तु कच्छपे ॥ १७ ॥
आदित्ये च समुद्रे च दावा स्याद्दातृदानयोः ।
लोधं लुब्धेऽथ वाशी स्याद्वाचि च्छेदनसाधने ॥ १८ ॥
इदानीमपि चेत्यर्थे नू च स्यान्नूचिदित्यपि ।
विषुणो विषमेऽपि स्यान्मन्दीति स्तुतिमत्यपि ॥ १९ ॥
अदितिर्देवमाता स्यात्प्रकृतिर्भूरखण्डिता ।
शिशीते तु श्यतीत्यर्थे सुतुकः सुप्रजाः सुगः ॥ २० ॥
पुनरुक्ते जामिशब्दो भगिन्यादौ च बालिशे ।
पिता तु प्रभुराजन्म जसुरिस्ताडिते तथा ॥ २१ ॥
बद्धमुक्ते च निहतवेगश्रान्ते बुभुक्षिते ।
एरिरे प्रेरयामासुः शंयुः सुखयुरुच्यते ॥ २२ ॥
बृहस्पतिसुते रोगशमने भयनाशने ।
अप्रायुवोऽप्रमाद्यन्तोऽप्रगच्छन्तोऽपि वा मताः ॥ २३ ॥
अस्या अस्येति षष्ठ्यन्तं पद्बन्द्वमुदात्तवत् ।
आदेशेऽथानुदात्तं स्यादन्वादेशे यदा भवेत् ॥ २४ ॥
भुव्यध्वनि गतौ गातुस्तूतावववृधे समौ ।
दंसयो दासकर्माणि सन्ति सुप्रायणाः सुगाः ॥ २५ ॥
तास्तु यज्ञगृहद्वार इति यास्कोऽभिमन्यते ।

अर्चिषः शाकपूणेस्तु मते सुप्रायणा इति ॥ २६ ॥
रश्मौ सूर्ये बलीवर्दे धेनौ भुवि च वाचि च ।
वज्रेऽम्बुनि शरे स्वर्गे लोम्नि गौरिति पठ्यते ॥ २७ ॥
च्यवनो वा च्यवानो वा भार्गवे स्तोतरि स्मृतः ।
जरते स्तौति वियुते पृथग्भावे ऋधक् पृथक् ॥ २८ ॥
चयसे नाशयस्यर्थे जुहुरे जुह्विरे यथा ।
द्विषष्टिपदजातानामेवमर्था निरूपिताः ॥ २९ ॥

*

सस्निर्मेघेऽपि संस्नातेऽप्यन्धोऽन्नादकृतमः स्वपि ।
अथ कामयमाने स्याद्वावशानोऽभिवक्तरि ॥ ३० ॥
वार्ष्यं तु वरणीयं स्याद्यद्दत्यन्तं वरं भवेत् ।
दूतो वृत्तवहे सिद्धः, क्रोधे घाते वनुष्यति ॥ ३१ ॥
भन्दना तु स्तुतौ, क्रूरवाक्यादाहन्तराहनः ।
आशिष्टात्तैषमत्तारीदित्यर्थेऽत्ता इतीष्यते ॥ ३२ ॥
भ्रात्रं धने च क्षिप्रे च तरुष्यति जिघांसति ।
जपत्यध्येतरि ऋषौ नद ऊतिस्तु तर्पणे ॥ ३३ ॥
रत्नायां हासमानन्तु स्पर्द्धमाने च हृष्यति ।

सप्तं माध्यमिकं ज्योतिरुच्यतेऽनित्यदर्शनात् ॥ ३४ ॥
स्पर्शनैर्बाधनैः पानैः पादैः षड्भिर्द्विता द्विधा ।
पविर्वज्रे वाचि यज्ञे रथचक्रप्रधावपि ॥ ३५ ॥
वाहिष्ठोऽत्यधिकं वोढाऽऽह्वाता वाऽत्यधिकं च यः ।
व्रा व्रात्या वरितारश्च केषांचिदुषसो मते ॥ ३६ ॥
वराहोऽभ्रे च भूदारे वराहा आङ्गिरोगणाः ।
ये च माध्यमिका देवगणास्ते तु वराहवः ॥ ३७ ॥
प्रजापतिः पुरा वायुर्भूत्वाऽप्सु त्रिचरँस्ततः ।
उज्जहार स एमूषो वराहः पृथवीमिमाम् ॥ ३८ ॥
वृत्ते चान्ने च मन्त्रे च देवे चार्कः प्रतिष्ठितः ।
अन्तरिक्षे तु धन्व स्याद्धन्वा स्यान्मरुदेशके ॥ ३९ ॥
भुजयोरन्तरं वक्षः पक्षसी ये द्विदिङ्नते ।
सचा सह सिनं त्वन्नं महावेगः पृथुज्रयाः ॥ ४० ॥
असश्चन्ती न सज्येते न व्युदस्यत एव वा ।
अन्तरेण समानेनान्योन्यमाश्रित एव ये ॥ ४१ ॥
इषवोऽङ्गुलयः शर्य्या इत्था त्वित्थमुभौ समौ ।
या सोमक्रयणी गौः स्यात् तत्र नामैव चित्पदम् ॥ ४२ ॥
पूजोपमावकुत्सावावनुदात्तं तु चित्पदम् ।

आघृणिस्त्वागतक्रोधे तथैवागतदीप्तिके ॥ ४३ ॥
द्युम्नं धनयशोऽन्नेषु पवित्रं त्वप्सु रश्मिषु ।
मन्त्रेऽप्यग्नौ च वायौ च सोमे सूर्य्ये मघोनि च ॥ ४४ ॥
अङ्गूषः स्तोम एवेष्टः, काणुका कामुकोऽथवा ।
हतपानाभिलाषो वा काणुका कणशः कृतम् ॥ ४५ ॥
शिपिविष्टपदेनासौ विष्णुः प्रायो विशेष्यते ।
अर्वागर्थे तूपमार्थे चार्थेऽध्यर्थेऽपि आ इति ॥ ४६ ॥
तोदस्तुदो गृहस्थः स्यात् कूपो भूबिलमेव वा ।
स्वश्चाः सुगमनो योऽर्थो नाडी कुल्या नदी श्मशा ॥ ४७ ॥
आदित्ये द्वादशे विष्णुर्यज्ञे वा व्यापकेऽपि वा ।
उर्वश्यप्सरसि प्रज्ञाकान्त्योस्तु वयुनं भवेत् ॥ ४८ ॥
वृकस्तु चन्द्र आदित्यः श्वा वज्रोऽथ वृकी शिवा ।
आपान्तमन्युः सोमे स्यादिन्द्रे वा मन्युयोगतः ॥ ४९ ॥
तूर्णाशं शीघ्रसंव्याप्ति शीघ्रभक्ष्यथवोदकम् ।
गाढमङ्गैः परिष्वक्ता गाधिता परिकीर्तिता ॥ ५० ॥
गध्यं तु ग्रहणीयेऽर्थे सोमे भूयः प्रयुज्यते ।
स्तोमं प्रति गतो यज्ञं प्रति वा गत आरितः ॥ ५१ ॥

वाजपस्त्यो वाजगन्ध्यः सोमे ब्रह्मविशोषिते ।
जोषवाकमविस्पष्टवचनं श्रव्यवागपि ॥ ५२ ॥
निचुम्पुणपदेनासौ सोमः प्रायो विशेष्यते ।
निचुम्पुणः समुद्रोऽपि वरुणोऽम्बृथोऽपि च ॥ ५३ ॥
कृतयात्रे कौरयाणस्तौरयाणस्तु शीघ्रगे ।
क्षुम्पं त्वहिच्छत्रकं स्यात् क्षुभ्यते यदयत्नतः ॥ ५४ ॥
पादुः पादतलासक्तचर्म्मकाष्ठादिके गमे ।
पादिः पत्ती, परीत्येतत् सर्वतोभाव इष्यते ॥ ५५ ॥
भागवीप्सालक्षणेत्थंभूताख्यानेषु वर्जने ।
हरयाणो नित्यकालमभिप्रस्थितयानके ॥ ५६ ॥
प्राणैश्वर्यादिहरणप्रयाणे वापि गद्यते ।
प्रहयाणो वदान्यत्वादलज्जितगतिर्मतः ॥ ५७ ॥
निष्पपी क्षीरतो यस्य शेपो नित्योद्धतः स्त्रियै ।
वृतुमाकुष इत्येतत्त्वर्णमाकुरुषेऽपि वा ॥ ५८ ॥
त्वरया कुरुषे वापि काकुदं तालु कथ्यते ।
केपयस्तु कपूयाः स्युर्ये हि दुष्कर्म्म कुर्वते ॥ ५९ ॥
अंसत्रं कवचं वा स्याद्धनुर्वाऽप्यथ वीरिटे ।
शून्यस्थानेऽन्तरिक्षे वा समवायेऽपि वा नृणाम् ॥ ६० ॥

चर्षणिस्तु जनो द्रष्टा सृणिर्वज्रेऽङ्कुशेऽपि च ।
शम्बो वज्रेऽथ निर्दिशेऽपीदमर्थेऽपि वेमिति ॥ ९१ ॥
सीम् स्यात् सीमान इत्यर्थे व्यर्थं वा पदपूरणम् ।
एनामेनं द्वितीयान्तं पदद्वन्दमुदात्तवत् ॥ ९२ ॥
आदेशेऽथानुदात्तं स्यादन्वादेशे यदा भवेत् ।
समः सर्वोऽच्छशब्दस्याभिमुख्ये वृत्तिरिष्यते ॥ ९३ ॥
अथवा प्राप्तुमित्यर्थो मन्यते शाकपूणिना ।
कुटः कृतेऽथर्व्युरिति बह्वौ गमनशालिनि ॥ ९४ ॥
अथेर्व्यवो बाहवः स्युरथर्व्योऽङ्गुलयः स्त्रियः ।
अधिगुस्त्वग्निरिन्द्रश्च यस्यामतिहता गतिः ॥ ९५ ॥
मन्त्रोऽप्यधिगुरुद्दिष्टः कृत्तिरन्नं यशोऽपि च ।
कृत्तिश्चर्ममयं वस्त्रं कन्था सूत्रमयी तथा ॥ ९६ ॥
श्वघ्नी स्यात् कितवोऽहानि स्वसराणि भवन्ति हि ।
ब्रन्दी तु मृदुलो वा स्यान्मार्दवापादकोऽपि वा ॥ ९७ ॥
इत्यर्थाश्चतुराशीतिपदानामूहिता बुधैः ।



आशुशुक्षणिरग्निः स्यादाशास्तूपदिशो दिशः ।
सललूकं तुतदूरक्षः संलुब्धं पापकं च यत् ॥ ६८ ॥
संमूढं प्रच्युतं स्थानादथवाऽप्यपसारि यत् ।
अलमातर्दनो योऽर्थः स मेघः स्यादलातृणः ॥ ६९ ॥
अलातृणः कुणारुश्च कियेधाश्च शिरिम्बिठः ।
इलीविशः कत्पयं च पड्भिर्मेघो विशिष्यते ॥ ७० ॥
कुणारुः क्रणनस्तद्वत् कत्पयः स्यात् सुखोदकः ।
नक्तदाभमभिख्याप्य हन्तारं विद्धि वज्रिणम् ॥ ७१ ॥
काशिर्मुष्टिः सबीमेति स्यादनुज्ञार्थकं पदम् ।
मृदूदरस्तु यः सोमः स एव स्याद्दृदरः ॥ ७२ ॥
अर्द्दनात्पालकौ बाहू ऋदूपे भवतोऽथवा ।
ऋदुशब्दो मर्मवाची बाहू स्तो मर्मपालकौ ॥ ७३ ॥
किः कर्ता, यस्तु दीर्घायुः सोऽस्कृधोयुः कृधुर्लघुः ।
हनू असंखादन्त्यौ चेत् कथयेते असिन्वती ॥ ७४ ॥
प्रसिद्धदीप्तिमत्त्वा तु भाक्रजीकोऽग्निरुच्यते ।
पुलुकामस्तु बहिच्छो रुजाना नघ ईरिताः ॥ ७५ ॥
जूर्णिर्हेतिश्चमूः क्रोध श्रोमना त्वत्रनेन वा ।
उपलप्रक्षिणी धान्यभर्जनी सक्तुकारिका ॥ ७६ ॥

पाथोऽन्तरिक्षमापोऽम्बं सप्रथाः सर्वतः पृथुः ।
कपनाः कृमयो, देवाच्या कृपेति पदे युजौ ॥ ७७ ॥
देवान् प्रत्यक्तया तद्वत् कल्प्ययेत्यर्थमाहतुः ।
वृवदुक्थो महोक्थः स्याद्यस्मै वोक्थं प्रयुज्यते ॥ ७८ ॥
वणिक् प्रकलविद् यो हि गणितं वेत्ति तत्त्वतः ।
ओषध्यो वीरुधोऽथापः शुरुधोऽन्नं चनः स्मृतम् ॥ ७९ ॥
शशमानः शंसमानः शाशदानस्तु यो मुहुः ।
अत्यन्तं वा शातयति श्रायन्तस्तु समाश्रिताः ॥ ८० ॥
समाश्रयन्तः श्रायन्तः, पक्वस्तु पचता समौ ।
अग्रिया तु भवेदग्र्या ऽग्रगत्याप्यग्र एव वा ॥ ८१ ॥
विज्ञानानि च यज्ञाश्च विदथानि प्रचक्षते ।
विजामाता न यत्रास्ति जामातुः सर्वलक्षणम् ॥ ८२ ॥
ईक्षे तथेशिषे तुल्यौ क्षोणो निवसिता भवेत् ।
क्षोणं निवासस्थानं स्याद् भवन्त्यापस्तु विस्रुहः ॥८३॥
अभ्यर्द्धयज्वा पूषा स्मान्मरुद्भ्योऽभ्यर्धयन् रसान् ।
मूनानि वाभिमुख्येन वृद्ध्या योजयतीह सः ॥ ८४ ॥
दुरितं दुर्गतिकरं स्तिया आपोऽतिसंहृताः ।

शीघ्रं सम्भाजको योऽर्थः स तुर्वणिरुदाहृतः ॥ ८५ ॥
स्तिपा अग्निर्हिमात् पाति कूपो वा पात्युपस्थितान् ।
श्रुष्टी क्षिप्रं सुखं धान्यशलाकाप्यभिधीयते ॥ ८६ ॥
सोमानमभिषोतारमोमासो रक्तकास्तथा ।
तर्पकास्तर्पणीयाश्च सोऽमिनो यो ह्यहिंसितः ॥ ८७ ॥
अमिनोऽमिनमात्रश्चानन्तकालोऽपि वामिनः ।
अमूर इत्यमूढः स्यात् किमीदी पिशुनो मतः ॥ ८८ ॥
सूप्रः सर्पोऽथ सर्पिर्वा तैलं वा सर्पणाद् भवेत् ।
शिप्रे हनू नासिके वा सुशिप्रो यस्य ते शुभे ॥ ८९ ॥
अक्रः प्राकार इत्युक्तो यदाक्रामति सोऽम्बरम् ।
सूर्ते सुविस्तृते व्योमन्यसूर्ते वायुविस्तृते ॥ ९० ॥
यस्त्वप्रत्यागतो युद्धेऽन्येनाप्रतिगतोऽपि वा ।
योऽप्रतिस्खलितः पूर्वमन्याप्रतिहतोऽपि वा ॥ ९१ ॥
पराङ्मुखः कृतो नो यः स च स्यादप्रतिष्कृतः ।
सुविवस्त्रः सुविधः स्यात् सुदत्रस्तु सुदातरि ॥ ९२ ॥
अभ्यक् त्वसम्यगेव स्यादृक्षृष्टिर्वाभिगता रिपून् ।
सहभूतापि वा सा स्यादि रमणीयेषु रंस्वति ॥ ९३ ॥

प्रसक्रा त्वनपाया स्यादथासाधारणी च सा ।
उल्वं जरायोरप्यन्तर्गर्भवेष्टनमुच्यते ॥ १०३ ॥
येनाशयन्ति हिंसन्तं ते कथ्यन्ते रिशादसः ।
अविश्लथमविश्रान्तं शीघ्रं वापि हरन्ति ये ॥ १०४ ॥
तेऽश्वानिशृम्भाः कथ्यन्तेऽनवायं त्वावियोजनम् ।
निःशेषं चाननायं स्यात् कियेधा इन्द्रमेघयोः ॥ १०५ ॥
प्राप्तौ धाना ऋृजीषं च तावित्रद्राश्वौ प्रतद्वसू ।
स्यादागल्दापि गल्दापि नाडी गलितधारिणी ॥ १०६ ॥
जह्लवे[1]ऽग्निविहीनः स्यादसमाप्तमसामि च ।
कीकटा असदाचारास्तद्देशाः कृपणा अपि ॥ १०७ ॥
ऋृषिः कृषिः पराभूतिकर्तेन्द्रश्च पराशरः ।
शिरिम्बिठस्तु मेघः स्याद् भारद्वाजः शिरिम्बठः॥ १०८॥
वेकनाटा वादंधुषिका वृन्दं जनसमूहके ।
इषुर्बुन्दोऽशनिर्बुन्दो हिनोत हिनुतेतिवत् ॥ १०९ ॥
यस्त्वप्रतिहताज्ञः स्यात् कथ्यते सोऽनवब्रवः ।
उराणो बहु कुर्वाण उपस्थे तूपसीति च ॥ ११० ॥
दिविष्टयो दिव्यगतिमसाधिन्यः क्रिया मताः ।
अभिधेतनशब्दस्य भाषायामभिधावत ॥ १११ ॥

जिन्वन्ति प्रीणयन्तीति कुलिशं वज्रमुच्यते ।
अजीगरीति चागारी रक्षिस गृह्णासि वा तथा ॥ १.२१ ॥
अनश्लीलप्रदाता योऽनर्शरातिः स उच्यते ।
अनश्लीलप्रदानं वानर्शरातिरुदाहृता ॥ १.३१ ॥
क्रिविर्दृती शतघ्नी स्यात् तुरीषमुदकं मतम् ।
रास्पिनः शब्दवन्नीरं तद्वान्मेघोऽपि रास्पिनः ॥ १.१४ ॥
उच्चार्यमाणस्तोत्रेण स्तोता वा रास्पिनः स्मृतः ।
अमत्रोऽपरिमाणः स्यात् स च योऽनभिहिंसितः ॥ १.१५
ऋजुनीती त्ववक्राध्वनेतारौ साधुसंविदौ ।
यथेच्छस्तूयमानार्थगुणशाली त्वृचीषमः ॥ १.१६ ॥
द्विबर्हा बर्दर्धमानो यो द्वयोरपि दिवोः समम् ।
हिंसा वृद्धिः परिवृढो वर्हणा परिबर्हणा ॥ १.१७ ॥
चायन् कामयमानो वा चाकन् कामयतेऽपि वा ।
स्तोत्रं जरूथं दूतस्तु वृत्तबाह्यथ ऋज्रानिः ॥ १.१८ ॥
आत्मसात्करणे धातुः स समीकरणेऽपि च ।
जवारु मण्डलं भानोरनर्वाऽन्यसमाश्रितः ॥ १.१९ ॥
चोष्कूयमाणस्तु भृशं व्युदस्यन् वा भृशं ददत् ।
चोष्कूयते भृशं दत्ते व्युदस्यत्यथवा भृशम् ॥ १.२० ॥

भ्रमिता वा भ्रमयिता भूमिराग्निर्विशोष्यते ।
वतस्तु दुर्बलोऽर्थः स्य द् वत खेदानुकम्पयोः ॥ १२१ ॥
बहुकर्मा बहुयज्ञः पुरान्धिः स्यात् पुरन्दरः ।
वरुणोऽपि पुरन्धिः स्याद् वाताप्यं वर्षसोदकम् ॥ १२२ ॥
रथं वा रंहणं वापि यादिच्छति रथर्य्यति ।
कृत्तदन्ततया देवः पूषा प्रोक्तः करूडती ॥ १२३ ॥
स्यादलक्ष्मीः सदान्वेति दुर्भित्तस्यापि देवता ।
जज्झतीरीदृशं शब्दं कुर्वाणा आप एव च ॥ १२४ ॥
इंद कामयमानो यः स इंदयुरुदाहृतः ।
वसूयुर्विप्रयुः शंयुः किंयुरिसावयस्तथा ॥ १२५ ॥
शरारुः संशिशरिषुर्विद्धि दानपरान् दनः ।
आकम्पनस्त्वाधवः स्याद् विप्रात्वात्तु विष्पितः ॥ १२६ ॥
इतश्चेतश्च विस्तीर्णो विप्रास्र इति कथ्यते ।
ऋवीसं पृथिवीमाहुर्नैगमार्थीवशारदाः ॥ १२७ ॥
इतीत्थमर्था आख्याता यास्कव्याख्यानुसारतः ।
द्वात्रिंशशतसंख्यानां पदानामपि पूर्ववत् ॥ १२८ ॥

*

शब्दसारूप्यसम्बन्धादर्थबोधाविरोधतः
प्राचीनैरूहिता अर्थाः सर्व एवात्र दर्शिताः ॥ १२९ ॥
श्रद्धेया नैव ते सर्वे प्रादेशिकतया कृताः ।
अनैकान्त्यात् प्रदेशस्य मण्डलीमण्डपादिषु ॥ १३० ॥

पदजात्याऽभिधेयेन संस्कारेण स्वरेण वा ।
गुणेन वा विभागेन विक्षेपेण क्रमेण वा ॥ १३१ ॥
अध्याहारेण वा तद्वद् व्यवधानादितोऽपि वा ।
यानि यानि पदान्यत्र निर्दर्शयन्ते न तत्त्वतः ॥ १३२ ॥
यानि वा परिदृष्टानि बहुष्वर्थेषु कानिचित् ।
तेषां कृतो निदर्शाय पदानामेष संग्रहः ॥ १३३ ॥

स्वेति नाम निपातो वा पदं जात्या न निश्चितम् ।
शितामेति गुदं शाकपूणेर्यास्कस्य दोः पशोः ॥ १३४ ॥
तैटिकेस्तु यकृच्छ्यामं तस्माद्राक्ष्यं न निश्चितम् ।
ईम्मान्तास ऋृवीसं च संस्कारे नावधार्यते ॥ १३५ ॥

"वने न वायो"–* इत्यत्र स्वरान्नावगतं पदम् ।
प्रदेशतोऽनवगतं "करूडत्यादिकं पदम्" ॥ १३६ ॥
मेहनेत्यत्र न ज्ञातो विभागोऽस्ति विरोधतः ।
तत्रैकपद्यं शाकल्यो मेने गार्ग्यः पदत्रयम् ॥ १३७ ॥
द्यावा नः पृथिवीत्येतद्विच्छेपानवधारितम् * ।
क्रमस्तूपरमध्वं म–इत्यादौ नावगम्यते * ॥ १३८ ॥

* वने न वायो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः ।
यस्येदिन्द्रः पुरुदिनेषु होता नृणां नय्यों नृतमः क्षपावान् ॥
ऋ० सं० ७ । ७ । २२ । १ ऐ० आ० ५ । ३

अत्र वेति य इति पदद्वयं शाकल्यो मेने । किन्तु पदद्वयस्त्वे यदृवृत्तात्परस्य न्यधायीत्याख्यातस्योदात्तत्वमभविष्यत् । दृश्यते तु निघातः। तस्माद् - वाय–इत्येकमेव पदम् ।

* द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम् । यज्ञं देवेषु यच्छताम् । ऋ० २ । ८ । १० । ५

* रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्त्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषाऽवस्युरह्वे कुशिकस्य सूनुः॥
ऋ०३ । २।१२ । ५ ।

का क्रिया "दानमनसो नो मनुष्यान्" इति स्थले ।
वायुर्नियुत्वान्—*इत्येतद् व्यवधानान्न निश्चितम् ॥१.३६॥
इत्थं दशानवगमाः शब्दा एते प्रदर्शिताः ।
ततोऽन्यथापि बहुधा दृश्यते सङ्करक्रमः ॥ १४० ॥
तत्र तत्र प्रकरणे यादृगर्थोऽवभासते ।
तथा तथार्थं कल्पन्ते मतिभेदात् पृथक् पृथक् ॥ १४१ ॥
इत्थमेवेति नाद्यापि तेऽर्थाः शक्याः प्रकल्पितुम् ।
अन्योऽप्यर्थो भवेदेषां प्रज्ञया संप्रधारितः ॥ १४२ ॥
कानिचित्तु पदान्यत्र बह्वर्थानि भवन्ति हि ।
रजोहरःसदृक्षाणि तेषां पाठः प्रसङ्गतः ॥ १.४३ ॥

## इति ऐकपादिकार्थवर्गः । ८

* प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तो रुशतः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ।
ऋ० सं० ५ । ४ । ६ । २ ।

स्तृभिर्ऋत्वा च नक्षत्रे, तथाऽल्पे दभ्रमर्भकम् ।
मेना ग्नाः स्त्रीष्वया एनाऽन्वक्षनिर्देशकर्म्मणि ॥ १ ॥

अभित्वे च प्रपित्वे चासन्ने, प्राप्ते तिरः सतः ।
स्यातामावपने शब्दावूर्द्धरं कुदरं तथा ॥ २ ॥

रम्भः पिनाकं दण्डे स्याद्, वम्रीभिरुपजिह्विका ।
सीमिकासु, प्रजनने शेपः स्याद् वैतसोऽपि च ॥ ३ ॥

अर्द्धे त्वनेमौ, सचते सिषक्तु च निषेवणे ।
भयत्रेपनयोः स्यातां भ्यसते रेजतेऽपि च ॥ ४ ॥

इति द्विपदैकार्थसंग्रहः ८

स्वर्गौः पृश्निर्नभो नाको विष्टपं चेति पदानि षट् ।
समानि दिवि चादित्ये साधर्म्यात् परिचक्षते ॥ १ ॥

खेदा तु किरणा गावो रश्मयोऽभीशवस्तथा ।
आदित्यरश्मिवत् प्रोक्ता एते पञ्चाश्वरश्मिषु ॥ २ ॥

अद्रिर्गोत्रो गिरिर्ग्रावा पर्वतोऽश्मा व्रजो बलः ।
रौहिणो रैवतोऽप्यश्नो वराहः शम्बरुश्चरुः ॥ ३ ॥

पर्शानः * पुरुभोजाश्च फलिगश्चोपरोपलौ ।
शैलेऽपि मेघवत् प्रोक्ताः शब्दा एकोनविंशतिः ॥ ४ ॥

इति द्व्यर्थसाधारणपदानि ६

बलिशानः इत्यपि शब्दपाठः ।

# अनेकार्थवर्गः ९

## अ

अथादित्ये समुद्रे चाकूपारः कच्छपेऽपि च ।
अक्षरं वाचि तु क्लीवेऽक्षये त्रिषु तथोदके ।
यज्ञेऽध्वरोऽध्वरं व्योमन्यपस्तूदककर्म्मणोः ॥ १ ॥
अप्रस्तु पदनाम स्याद्रूपेऽपत्ये च कर्म्मणि ।
अभ्रो महति पुंसि स्यादभ्रं तूदकमेघयोः ॥ २ ॥
अमतिः पदनाम स्याद्रूपेऽप्यमतिरुच्यते ।
अम्बरं व्योम्नोरर्कौ वज्रान्नयोः पदम् ॥ ३ ॥
ह्रस्वेऽर्भकोऽर्भकं तु स्यादुत्तराणि पदान्यधि ।
पृथिव्यामवनिर्नद्यङ्गुलिष्ववनयः पृथक् ॥ ४ ॥
अश्वः पदं च मेघे च पदमघ्न्या तथा गवि ।
नदीषु च जले चार्णाः द्विरग्निः पदनामसु ॥ ५ ॥
अजिरं चाजिराश्चेति क्रमात् त्रिष्वे नदीष्वपि ।
अदितिः पदनाम द्विः पृथिव्यां गवि वाचि च ॥ ६ ॥
द्यावाभूम्योरेकयोक्त्याऽप्यदिती इति चक्षते ।

आहिः पदं जले मेघे द्यावाभूम्योस्तु गव्यही ॥ ७ ॥
अभीके इति सङ्ग्रामे चोत्तराणि पदान्यधि ।
अभीशवः पदं रश्म्यङ्गुलिषु द्वित्वतो भुजे ॥ ८ ॥
नद्यङ्गुलिष्वग्रुवस्युर्महत्यद्भुतमद्भुतः ।
पुंसि क्लीवे चोदकेऽम्बर्जुनं रूपेऽर्जुनीत्युषाः ॥ ९ ॥
अश्वेऽरुषोऽरुषं रूपे उषासि त्वरुषी भवेत् ।
उषस्येव त्वरूषी स्याद्धिरण्ये चोदकेऽमृतम् ॥ १० ॥

## आ

आपस्तु पदनाम स्यादन्तारक्षे तथोदके ।
आशुरश्वे त्रिषु क्षिप्रे आके अन्तिकदूरयोः ॥ ११ ॥

## इ

वागन्नपृथिवीगोषु स्यादिला पदनाम च ।
इत्था पदं च सत्ये चेन्दुर्य्यज्ञोदकयोः पदम् ॥ १२ ॥

## ई—उ

ईं जले च पदं च स्यात्, पदनाम द्विरुर्वशी ।

दिव्यूपराः पुमान् मेघे, गव्युस्त्रोस्त्रास्तु रश्मयः ॥ १३ ॥
उषाः पदं द्विरुर्वी तु द्यावाभूम्योस्तथा भुवि ।

## ऋ

ऋतः पदमृतं सत्ये धने स्यादुदकेऽपि च ॥ १४ ॥

## ओ–क

उदकेऽपि बलेऽप्योज उदकेऽपि सुखेऽपि कम् ।
क्षुभ्र इत्यत्र एव स्यात् क्षुभ्र स्यादुदकान्नयोः ॥ १५ ॥
उदकेऽपि धने क्षत्रं कशा वाच्युदके कशः ।
क्षपा जल क्षपा रात्रौ क्षितिर्भूः क्षितयो नराः ॥ १६ ॥
वज्रे पदं च कुलिशः कृत्तिर्गेहे पदं तथा ।
कृदरं तूत्तरपदं कृदरः स्याद्गृहार्थकः ॥ १७ ॥

## ग–घ

बाह्वोर्गभस्ती भूम्नि स्याद्रश्मिष्वप्यङ्गुलिष्वपि ।
भारमुदके क्लीवे गंभीरा महति त्रिषु ॥ १८ ॥

गंभीरा वाचि गंभीरे द्यावाभूम्योर्गभीरवत् ।
गयो गृहधनापत्ये गातुर्भूमौ पदं तथा ॥ १९ ॥
गोत्रो मेघो मही गोत्रा गौः पदं द्विरुदीरितम् ।
गौः स्तोता वाक्पृथिव्योर्गौः गौः साधारणनाम च॥ २० ॥
गौरी वाचि पदं च स्याद् घर्म्मयज्ञे दिने पुमान् ।
घृणिर्दिने घृणिः क्रोधे ज्वलद्वस्तु तथा घृणिः ॥ २१ ॥

## च—ज

चर्षणिः पदनाम स्याद्भूम्नि चर्षणयो जनाः ।
पुनरुक्ते जामिशब्दो भगिन्यादौ च वालिशे ॥ २२ ॥
मुखे जले जलाषं स्याज्जूर्णिः क्रोधे च सत्वरे ।
जूर्णिः पदं सत्वरे तु जूर्णीरित्यपि दृश्यते ॥ २३ ॥

## ट

त्वष्टा पदं त्रिरुद्दिष्टं तार्क्ष्योऽश्वः पदनाम च ।
यज्ञाकाशवरिष्ठाग्निवाचकस्तुग्र इष्यते ॥ २४ ॥
तुञ्जः पदं च वज्रे च तुर्वशस्तुर्वशेऽन्तिके ।

तुर्वशास्तु मनुष्याः स्युस्तूयं क्षिप्रे तथोदके ॥ २५ ॥
तेजो जले ज्वलत्यर्थे तोयं क्षिप्रे तथोदके ।

## द

अश्वनाम दधिक्रेति दधिक्राः पदनाम च ॥ २६ ॥
दभ्रं परपदं ह्रस्वे द्रविणं तु धने बले ।
दिधीतयो दीधितयोऽप्यङ्गुलिष्वपि रश्मिषु ॥ २७ ॥
द्युम्नं पदं धनेऽपि स्याद् दूतो द्विः पदमुच्यते ।

## ध-न-प

अन्तरिक्षे पदं धन्व धीः प्रज्ञायां च कर्म्मणि ॥ २८ ॥
धेनुः पदं वाच्यपि स्यान्नदः स्तोतरि वा पदम् ।
नभ्यः पदं च नभ्यां च नभः साधारणं जले ॥ २९ ॥
वज्रान्नयोर्नभःशब्दो नरोऽश्वे च मनुष्यके ।
नराशंसः पदं द्विः स्यान्नृम्णं तु स्याद्धने बले ॥ ३० ॥
नेमः प्रपदं चान्ने, पयोऽन्नजलरात्रिषु ।
पयो ज्वलद्ह्रस्वापि स्यात्पदं यज्ञः प्रजापतिः ॥ ३१ ॥

पविः पदं वज्रवाचोः स्यादम्बोदकयोः पयः ।
जले पदं पवित्रं स्यात्पानस्त्वन्ने बलेऽपि च ॥ ३२ ॥
द्यावाभूमी पुरन्धी स्यात्पुरन्धिः पदनाम च ।
पूषा पदं पृथिव्यां च पृतना मानुषे रणे ॥ ३३ ॥
अन्तरिक्षे तु पृथिवी पदनाम च तत्त्रिधा ।
द्यावाभूमी च भूः पृथ्वी पेशो रूपहिरण्ययोः ॥ ३४ ॥

## ब

अश्वे महति च ब्रध्नो ब्रह्म त्वन्ने धने जले ।
उदके चान्तरिक्षे च बर्हिः स्यात्पदनाम च ॥ ३५ ॥

## भ—म—य

भगः पदं धनेऽपि स्याद्भूर्भुवौ चान्तरिक्षक ।
सुखे जले भेषजं स्यान्मन्युः क्रोधे पदं तथा ॥ ३६ ॥
मेघाविषु मनुष्याः स्युर्मनुष्या मनुजेष्वपि ।
मरुद्भिरराये रूपे च ऋत्विक्षु मरुतः पदम ॥ ३७ ॥
महोमहदिमौ शब्दौ महत्यप्युदकेऽपि च ।

गोघागृधारित्रीषु मही द्यावाभूमी तथा मही ॥ ३८ ॥
यज्ञमेधाविनोर्मेधो मेधा तु धनमुच्यते ।
परं पदं वाक् च मेना द्विरुद्दिष्टं पदं यमः ॥ ३९ ॥
यशो धनोदकान्नेषु योनिः स्यादुदके गृहे ।

र

रजः पदं रजो रात्री रयिस्तु स्याद्धने जले ॥ ४० ॥
रसो वागुदकान्नेषु रुजानाम्तु पदं नदी ।
रुद्रः पदं स्तोतरि च द्युभुवौ रोदसी पदम् ॥ ४१ ॥
रोहितोऽग्नि रोहितश्चाङ्गुलिप्त्वापि नदीप्त्वापि ।

व

वधो बले च वज्रे च वनं रश्मिषु चोदके ॥ ४२ ॥
वयुनं पदनाम स्यान् प्रशस्यप्रज्ञयोरपि ।
वराहस्तु पदं मेघे वरुणो द्विः पदं मतम् ॥ ४३ ॥
वसवो रश्मिषु पदं वसु रात्रौ धनेऽपि च ।
वाक्पदं वाक् च भाषायां मेधाव्यृत्विक्षु वाघतः ॥४४॥

वाज्यश्वे समरे वाजे वाजस्त्वन्ने बलेऽपि च ।
वाशी वाचि पदं च स्याद् विधाता परिडते पदम् ॥ ४५ ॥
विपो विदुष्वङ्गुलिषु द्विस्तु विश्वानरः पदम् ।
विष्णुर्यज्ञे द्विः पदञ्च, स्तेने वज्रे पदं वृकः ॥ ४६ ॥
वृत्रो मेघे धने वृत्रं, वेनो विद्यज्ञयोः पदम् ।
व्योमान्तरिक्षेऽप्युदके व्योमा तु दिशि दिश्यते ॥ ४७ ॥

## श

शची प्रज्ञाकर्म्मवात्तु शर्म्म तु स्यात्सुखे गृहे ।
मेघे तु शम्बरः पुंसि शम्बरं तूदके बले ॥ ४८ ॥
शर्म्मापदं चाङ्गुलिषु श्रवस्त्वन्ने धनेऽपि च ।
शवो धने बलेऽपि स्यात् श्वात्रं तु स्यादधने पदम् ॥ ४९ ॥
शिपे द्विः पदनाम स्यात्, शिल्पं रूपे च कर्म्मणि ।
शूपं बले सुखेऽपि स्यात् श्येनामोऽश्वे पदं त्वपि ॥ ५० ॥

## स—ह

सध्रोदके सध्र गृहे सध्र स्यात्समरेऽपि च ।

पदं तु सप्त ऋषयो रश्मिष्वपि तथोच्यते ॥ ५१ ॥
अन्तरिक्षे समुद्रः स्यात्समुद्रः पदनाम च ।
सरो वाच्युदकेऽप्येवं पदं वाक् च सरस्वती ॥ ५२ ॥
सलिलं बहु नाम स्यात्सलिलं जलनाम च ।
स्वः साधारणानाम स्यात्तथा स्वरुदकेऽपि च ॥ ५३ ॥
यज्ञाहःसूर्य्यदेवानां वाचकं स्वःपदं मतम् ।
सविता पदमुक्तं द्विः स्वधा त्वन्ने तथोदके ॥ ५४ ॥
स्वे द्यावापृथिव्यौ स्तः स्वसराणि गृहेऽहनि ।
स्वसराणि पदं च स्यात्सममन्ने पदं तथा ॥ ५५ ॥
सहो बले जलेऽपि स्यात्साध्या रश्मिषु वा पदम ।
सिनमन्ने पदं च स्यात्सुपर्णः पदमुच्यते ॥ ५६ ॥
सुपर्णा वाक् सुपर्णाः स्युरश्वेष्वपि च रश्मिषु ।
सूर्या वाचि पदं क्रोधज्वलतोस्तु हरःपदम ॥ ५७ ॥
माहुः परे हरःशब्दं ज्योतिर्लोकोदकेषु च ।
हरितोऽङ्गुलयो नद्यो दिशश्चादित्यवाहनम् ॥ ५८ ॥
हायिःपदं जलेऽपि स्याद् हेमोदकहिरण्ययोः ।
हिरण्योदकयोर्हेमा होत्रा यज्ञे च वाचि च ॥ ५९ ॥

अनेकार्था इमे शब्दाः पूर्वमत्र प्रदर्शिताः
मागुक्ता एव नानार्थे दर्श्यन्ते केऽपि धातवः ॥ ९० ॥

--*-

अर्हति स्याद्वधे गत्यां व्याप्तिगत्योस्तु इन्वति ।
इरज्यतीति धातुस्तु ऐश्वर्यपरिचर्य्ययोः ॥ १ ॥
ऋच्छिः परीचारगत्योर्वधगत्योर्ऋणाति च ।
जरते पदमर्चायां जिन्वतीति पदं गतौ ॥ २ ॥
दभ्नोत्यपि वधेगत्यां धमत्यर्चावधे गतौ ।
ध्रुवत्यपि वधे गत्यां व्याप्तिगत्योस्तु नक्षति ॥ ३ ॥
भन्दते भन्दतीति द्वौ ज्वलने पूजने क्रमात् ।
मन्दते ज्वलनेऽर्चायां मन्यते कान्तिपूजयोः ॥ ४ ॥
मर्दत्यपि वधे गत्यां मिनात्यपि वधे गतौ ।
मिनोत्यपि वधे गत्यां रथर्य्यति गतौ पदम् ॥ ५ ॥
राति दाने गतौ च स्याद्राजत्यैश्वर्यपूजयोः ।
वनुष्यति पदं क्रोधे वेति गत्यर्त्तिकान्तिषु ॥ ६ ॥
वेनत्यर्चागतीच्छासु परिचारे गतौ शवेः ।
सपत्यर्चापरीचारे स्त्रपित्यर्चननिद्रयोः ॥ ७ ॥

स्वरतीत्यर्चने गत्यां कान्तिगत्योस्तु हर्य्यति ।
ह्वयत्यर्चाभोजनयोरित्यनेकार्थधातवः ॥ ८ ॥
यज्ञवेदार्थयथार्थ्यविज्ञानाय कृतश्रमः ।
मधुसूदनशर्म्मैषां मणिमालां विनिर्म्ममे ॥ ९ ॥
सरस्वत्याः करे सेयं निघण्टुमणिमालिका ।
समर्प्यते मैथिलश्रीमधुसूदनशर्म्मणा ॥ १० ॥

इत्यनेकार्थवर्गः ॥ ९ ॥

# बृहद्देवतावर्गः१०

अथ केचित्प्रदर्श्यन्ते शौनकोक्ता यथायथम ।
देवताविषयश्लोका दैवतज्ञानसिद्धये ॥ १ ॥
भवद्भूतं भविष्यच्च जङ्गमं स्थावरञ्च यत् ।
अस्यैके सूर्य्यमेवैकं प्रभवं प्रलयं विदुः ॥ २ ॥
असतश्च सतश्चैव योनिरेषा प्रजापतिः ।
यदक्षरञ्च वाच्यञ्च यच्चैतद् ब्रह्म शाश्वतम् ॥ ३ ॥
कृत्वैष हि त्रिधात्मानमेषु लोकेषु तिष्ठति ।
देवान् यथायथं सर्वान् निवेश्य स्वेषु रश्मिषु ॥ ४ ॥
अग्निरस्मिन्नथेन्द्रस्तु मध्यतो वायुरेव च ।
मूर्य्यो दिवीति विज्ञेयास्तिस्र एवेह देवताः ॥ ५ ॥
अर्चिभिः केशयं त्वग्निर्विद्युद्भिश्चैव मध्यमः ।
असौ तु रश्मिभिः केशी तेनैनानाह केशिनः ॥ ६ ॥
न चैवैषां प्रसूतिर्वा विभूतिः स्थानजन्म वा ।
निर्वक्तुं शक्यमेतैर्हि कृत्स्नं व्याप्तमिदं जगत् ॥ ७ ॥
एतासामेव माहात्म्यान्नामान्यत्वं विधीयते ।
तत्तत्स्थानविभागेन तत्र तत्रोपलक्षयेत् ॥ ८ ॥

तासामियं विभूतिर्हि नामानि यदनेकशः ।
आहुस्तासां तु मन्त्रेषु कवयोऽन्योन्ययोनिताम् ॥ ९ ॥
यथास्थानं प्रदिष्टास्ता नामान्यत्वेन देवताः ।
तद्भक्तास्तत्प्रधानाश्च केचिदेवं वदन्ति ताः ॥ १० ॥
एतद्भूतेषु लोकेषु अग्निभूतं स्थितं त्रिधा ।
त्रिस्थानं चैनमर्चन्ति होत्रायां वृक्तबर्हिषः ॥ ११ ॥
इहेष पवमानोऽग्निर्मध्यमोऽग्निस्तु पावकः ।
अमुष्मिन्नेष विप्रैस्तु लोकेऽग्निः शुचिरुच्यते ॥ १२ ॥
इहाग्निभूतस्त्वृषिभिर्लोके स्तुतिभिरीडितः ।
जातवेदाः स्तुतो मध्ये स्तुतो वैश्वानरो दिवि ॥ १३ ॥
वैश्वानरं श्रितो ह्यग्निरग्निं वैश्वानरः श्रितः ।
अनयोर्जातवेदाश्च तथैतौ जातवेदसि ॥ १४ ॥
सालोक्याच्चैकजातत्वाद् व्याप्तिमत्वात्तु तेजसः ।
यस्य यस्येह देवत्वं दृश्यते ते पृथक् स्तुताः ॥ १५ ॥
सत्वान्यमूर्त्तान्यपि च देवतावन्महर्षयः ।
तुष्टुवुः प्रशशंसुश्च तासु तासु स्तुतिष्विह ॥ १६ ॥
पृथक् पुरस्ताद् ये तूक्ता लोकादिपतयस्त्रयः ।

तेषामात्मैव तत्सर्वं यद्यद्भक्तिः प्रकीर्त्यते ॥ १७ ॥
तेजस्त्वेवायुधं प्राहुर्वाहनञ्चैव तस्य तत् ।
( यदन्यच्चोपकरणं तत्सर्वं तत्र कल्पितम् ) ॥ १८ ॥
स्थानं नामानि भक्तीश्च देवतायाः स्तुतौ स्तुतौ ।
सम्पादयन्नुपेक्षेत यां काञ्चिदिह सम्पदम् ॥ १९ ॥
अग्निभक्तिस्तुतान् सर्वानग्नावेव समापयेत् ।
यदिन्द्रभक्ति तच्चेन्द्रे सूर्य्ये सूर्य्यानुगञ्च यत् ॥ २० ॥

## अग्निभक्तयः

तत्र यत्पृथिवीस्थानं पार्थिवञ्चाग्निमाश्रितम् ।
तत्सर्वमानुपूर्व्येण कथ्यमानं निबोधत ॥ २१ ॥
जातवेदाः श्रितो ह्यग्निमग्निं वैश्वानरः श्रितः ।
द्रविणोदास्तथेध्मश्च[1] श्रितश्चाग्निं तनूनपात्[2] ॥ २२ ॥
नराशंस[3]ः श्रितश्चैनमेनमेवाश्रितस्त्विळ[4]ः ।
बर्हिद्वार[5]श्च[6] देव्योऽग्निमेनमेव तु समाश्रिताः ॥ २३ ॥
नक्तोषासौ[7] च देव्यौ च होतारावेतदाश्रयौ ।
देव्यस्त्विष्ट्र[8]ः श्रिताश्चैनं त्वष्टा चैवैतदाश्रयः[10] ॥ २४ ॥

श्रितो वनस्पतिश्चैनं स्वाहाकृतेय आप्रियः ।
दैव्यौ दिव्यप्रसूतौ द्वावग्नी मध्यमपार्थिवौ ॥ २५ ॥
यदि वा वरुणादिस्यावग्न्यादेसौ प्रचेतसौ ।
तथाग्नीवरुणौ वापि केचिदिच्छन्ति सूरयः ॥ २६ ॥
इडा सरस्वती देवी भारती च यथाक्रमम् ।
पृथिव्यामन्तरिक्षे च दिवि देव्य इमा मताः ॥ २७ ॥
तनूनपातमाप्रीषु पठन्ति न पठन्ति च ।

*

अश्वश्च शकुनिश्चैव मण्डूकाश्चैतदाश्रयाः ॥ २८ ॥
ग्रावाणश्चैवमत्ताश्च नराशंसस्तथा रथः ।
दुन्दुभिश्चेषुधिश्चैतं हस्तघ्नोऽभीषवो धनुः ॥ २९ ॥
ज्या चैतदाश्रितेषुश्च श्रिता अश्वाजनी च या ।
वृषभो दुग्धणश्चैनमन्नापतुरुलूखलम् ॥ ३० ॥
नद्यश्चैवैनमापश्च सर्वाश्चौषधयस्तथा ।
राज्यपत्न्याप्राप्यरण्यानी श्रद्धेडा पृथिवी तथा ॥ ३१ ॥

*

भजेते चैनमेवात्नीं द्वन्द्वभूते च रोदसी ।
मुषलोलूखले चैनं हविर्द्धाने च ये स्मृते ॥ ३२ ॥
जोष्ट्री चोर्जाहुती चैनं शुतुद्र्या च विपाट् सह ।
यौ च देवौ शुनासीरौ तौ चाग्नी चैतदाश्रयौ ॥ ३३ ॥
शौनकस्य शुनासीरौ वायुसूर्य्यावुदाहृतौ ।
शाकपूणेरिन्द्रसूर्य्याविन्द्रो यास्कस्य केवलम् ॥ ३४ ॥

*

लोकोऽयं, यच्च वै प्रातःसवनं क्रियते मखे, ।
अनुष्टुप् च त्रिवृत्स्तोमो, वसन्तशरदावृतू ॥ ३५ ॥
गायत्री, चैकविंशश्च, यच्च साम रथन्तरम् ।
साध्याः, साम च वैराज, माप्त्याश्च वसुभिः सह ॥ ३६ ॥
इन्द्रेण च मरुद्भिश्च सोमेन वरुणेन च ।
पर्जन्येनर्तुभिश्चैव विष्णुना चास्य संस्तवः ॥ ३७ ॥
अस्यैवाग्नेस्तु पूष्णा च साम्राज्यं वरुणेन च ।
देवतावाहनञ्चैव हविषां वहनं तथा ॥ ३८ ॥
कर्म दृष्ट्वा च यत्किञ्चित्सम्बद्धं विषये स्थितम् ।

अग्नेरेव तु तत्सर्वं कर्मेति परिभाष्यते ।
इत्युक्तोऽयं गणः सर्वः पृथिव्यग्न्याश्रयो महान् ॥ ३९ ॥

## इन्द्रभक्तयः—

यश्चेन्द्रो मध्यमस्थानो गणः सोऽयमतः परः ।
विमानानि च दिव्यानि गन्धर्वाप्सरसां गणः ॥ ४० ॥
इन्द्राश्रयस्तु पर्जन्यो रुद्रो वायुर्बृहस्पतिः ।
वरुणः कश्च मृत्युश्च देवश्च ब्रह्मणस्पतिः ॥ ४१ ॥
मन्युश्च विश्वकर्मा च मित्रः क्षेत्रपतिर्यमः ।
तार्क्ष्यो वास्तोष्पतिश्चैव सरस्वांश्चैवमत्र ह ॥ ४२ ॥
अपां नपाद् दधिक्राश्च सुपर्णोऽथ पुरूरवाः ।
ऋतोऽसुनीतिर्वेनश्च तस्यै तस्याश्रयेऽदितिः * ॥ ४३ ॥
त्वष्टा च सविता चैव वातो वाचस्पतिस्तथा ।
